CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परमेश्वरशिवद्विजविरचितम्

आश्लेषानक्षत्रजात-

श्रीरामवर्ममहाराजचरित्रं काव्यम्.

महोपाध्यायेन

पण्डित. वे. वेङ्कटरामशर्मणा

विद्याभूषणेन

प्रसाधितं प्रकाशितं च.

SRI RAMA-VARMA-MAHARAJA CHARITRAM KAVYAM.

PARAMESVARA-SIVADVIJA.

(AUTHOR)

Critically Edited and Published

by

MAHOPADHYAYA

PANDIT. V. V. SHARMA. VIDYABHUSHANA.

607, VALIA CHALA STREET,

TRIVANDRAM.

1957

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya Bharatiya Vidya
720

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Bhawan's Sri Sankaracharya Sanskrit
720

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निवेदना.

इदं हि नाम श्रीरामवर्मचरित्राख्यं कवितागुणपुष्कलं प्रौढं काव्यम् आश्लेषानक्षत्रजातस्य श्रीरामवर्मवञ्चिमहाराजस्य चरितं, तत्पूर्वगतं वञ्चिराज्योदन्तं च वर्णयति। सङ्गीत-साहित्ययोर्विज्ञाता पण्डितपक्षपाती नीतिनिपुणो भरणधुरन्धरश्चायम् आश्लेषानक्षत्रजो महाराजरामराजः १०३६ तमकोलम्बाब्दमारभ्य १०५५ तमाब्दपर्यन्तं (१८६०–१८८० ए. डि.) वञ्चिमेदिनीमशिषद्, यस्य च भरणकाले वञ्चिक्ष्मेयं राजन्वती व्यलसत्। अष्टभिः सर्गैः समुपनिबद्धेऽस्मिन् काव्ये यथाक्रमम् अष्टभिरध्यायैरुपकल्पितानि पाणिनीयसूत्राणि आरोहानुसारं यथासम्भवं निदर्शितानीत्यप्ययं कश्चिद् विशेषः।

अस्य च काव्यस्य कर्ता परमेश्वरशिवद्विजः केरलसंस्थानान्तर्गतवैक्कंजनपदवर्तिव्याघ्रालयेशक्षेत्रपरिसरस्थगृहाभिजनः "वैक्कतु पाच्चुमूत्ततु" इति व्यवहारनाम्ना प्रथितः यश्च बाल्य एव संस्कृतसाहित्ये ज्योतिश्शास्त्र आयुर्वेदेऽन्यत्र च व्युत्पन्नबुद्धिः, ततःपश्चात् महावैयाकरणताम् आयुर्वेदवैद्यविद्याविशारदेपून्नतं पदं च महाराजीयास्थानविद्वत्तया समं, समेषामपि प्रत्येकाभिमानबहुमानभाजनमभूषयत्, यस्य च कन्याकुमारीजनपदान्तर्गत-शुचीन्द्रपुरवर्तिस्थाणुक्षेत्रे 'वट्टप्पल्लि'स्थानिकत्वं कुलपरम्परायत्तम्। काव्यमिदं १०३८ तमे कोलम्बाब्दे कन्यामासीयनवमदिने शिवद्विजेन महाराजायोपदीकृतम्। शिवद्विजसम्बन्धीनि विशेषापदानानि—

(१) अयं शिवस्याभिषेकप्रियतां विज्ञायेव १०४२ तमेऽब्दे प्रभूतेन ब्राह्मणसन्तर्पणेनाभिषेकविधानेन च निर्वाह्यं बहुवित्तव्ययायाससाध्यं सहस्रकलशाख्यं वैदिकं कर्म स्वकुलदैवतस्य व्याघ्रालयेशस्य प्रीत्यै यथाविधि प्रावर्तयत्।

(२) १०४३ तमेऽब्दे ज्योतिश्शास्त्ररीत्या भूगोलमेकं निर्माय महाराजायोपाहरत्।

(३) १०५६ तमेऽब्दे केरलेषु कूडलमाणिक्य-(इरिञ्ञालक्कुड)-क्षेत्राधिकृतस्य 'तच्चुडयकैम्मल्'नामकस्यावरोधविषये शास्त्रसम्बन्धिवादनिर्णयायायं विशाखभूपेनाश्लेषानक्षत्रजमहाराजानुजेन नियुक्तोऽभूत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(४) आश्लेषानक्षत्रजं वञ्चिमहाराजं द्रष्टुमनन्तशयनमभ्यागतः केरलजनपदाधिपतिः लोगन्महाशयः महाराजद्वारा शिवद्विजेन सह सख्यं प्राप्तः पश्चात् स्वदेशं गत्वा शिवद्विजस्यानितरसाधारणं सर्वतोमुखं विज्ञानं शास्त्रवैदुष्यं च निकाममभिनन्द्य महाराजाय लेखं प्राहिणोत्।

(५) १०५० तमेऽब्दे शिवद्विजोऽयं स्वप्नमेकमपश्यत्। स्वप्नवृत्तमिदम्—शिवभक्त एकः शुचीन्द्र-स्थाणुक्षेत्रे जर्जरितस्य गोपुरप्रासादस्य नवीकरणाय प्रचोदयन् 'तिरुनेल्वेलि'देशस्थस्य कस्यचन सन्न्यस्तस्य हस्त एतद्गोपुरप्रासादस्य चित्रपटं वर्तमानं न्यवेदयत्—इति। तदनुसारं शिवद्विजश्च तस्मात् सन्न्यस्ताच्चित्रपटं लब्ध्वा राज्ञः पौराणां च साह्यतः गोपुरनवीकरणाय प्रावर्तत। दुर्दैवविलसितादयं नवीकरणक्रियायाः समाप्तेः पूर्वमेव देवभूयमविन्दत। गोपुरान्तर्वर्तिचित्राणां पर्यवेक्षणे त्रिपु स्थलेषु महाराजानामभ्याशे शिवद्विजस्य छायाचित्रमिदानीमपि साक्षात्कर्तुं शक्यते।

(६) शिवद्विजोऽयं भारतवर्षे बहुत्र देशाटनमकरोत्। साहित्ये व्याकरणे सङ्गीते चित्रकलायाम् आयुर्वेदे चास्य शिष्यसम्पदतीव विपुलावर्तत। अनेन लिखितं स्वचित्रमिदानीमप्यस्य जननगृहे सुरक्षितं वर्तते। तदिदमस्य चित्रकलानैपुण्यमावेदयति। गान्धर्ववित्तकोऽयं प्रसिद्धिमान् वैणिकप्रवीणश्चासीदिति किंवदन्ती प्रचरति। अयं स्वान्तकालं पूर्वमेव विज्ञाय महाराजं व्यजिज्ञपत्। आयुर्वेदे तच्चिकित्सायां चातिनिपुणोऽयं गोश्रीराज्ये वञ्चिराज्ये च राजगृहवैद्यस्थानमवहत्। ईश्वरभक्ति-सौशील्य-परिश्रम-शील-धर्मनिष्ठादीनामुत्तमगुणानामादर्शभूतोऽयं शिवद्विजः केरलीयसाहित्यनभोमण्डल उज्ज्वलक्षायमाणो विलसत्येव।

अयं विविधेषु विषयेषु १३ ग्रन्थान् व्यरचयत्। केचन एकश्लोका उपन्यासाश्च एतदीयतया प्रसिद्धिमुपगताः सन्ति। प्रकृतकाव्यवर्जम् एतत्प्रणीता ग्रन्थास्त्विमे भवन्ति—

(१) हृदयप्रिया—६० अध्यायात्मकः बहुविषयप्रतिपादको वैद्यकग्रन्थः। त्रिवाङ्कूरराजकीयाधिकारिभिः देवनागरलिपिभिर्मुद्राप्य प्रकाशितः।

(२) सुखसाधकम्—रोगाणां निदान-लक्षण-चिकित्साः प्रतिपादयन्नयं वैद्यकग्रन्थः केरलभाषाव्याख्यासनाथः केरलेषु त्रिश्शूरनगरस्थभारतविलासमुद्रणालयात् प्रकाशितः।

(३) राजसूयप्रबन्धव्याख्या—मेलपत्तूर् नारायणभट्टपादकृतस्य राजसूयप्रबन्धस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वितता व्याख्येयम् आश्लेषानक्षत्रज-श्रीरामवर्ममहाराजप्रचोदनया विरचिता। नृगमोक्ष-प्रबन्धव्याख्या शिवद्विजोपज्ञं वा नवेति सन्देहो जागर्ति ।

(४) नक्षत्रमालास्तुतिः—संस्कृतस्तोत्रग्रन्थः ।

(५) काशियात्राप्रबन्धः—संस्कृतभाषाग्रन्थः ।

(६) केरलभाषाव्याकरणम्—केरलभाषायाम् ।

(७) त्रिवाङ्कूरराज्यचरित्रम्—केरलभाषायाम् ।

(८) केरलविशेषमाहात्म्यम् — केरलभाषायां केरलीयान् विशेषाचारान् प्रतिपादयति ।

(९) मुचुकुन्दमोक्षम्—केरलीयनाटकम् 'आट्टक्कथ'नाम्ना प्रसिद्धम् ।

(१०) बालभूषणम्—हितोपदेशपरं शास्त्रतत्त्वप्रतिपादकं च केरलभाषागद्यम्।

(११) सुखबोधकम् — मळमङ्गलनम्पूरिकृतस्य आशौचग्रन्थस्य संस्कृतव्याख्यानम् ।

(१२) काशियात्रावर्णनम्—केरलभाषामयम् ।

शिवद्विजमधिकृत्योक्ता इमे विषयाः शुचीन्द्रपुरवर्तिवट्टप्पल्लिस्थानिकैः प्रसाधितायां १९३८ तमीयजनवरिमासीय –'दि न्यू हेल्त्'मासिकायां १० – १६ पुटेषु प्रकाशिता इति सकृतज्ञं स्मरामः ।

अस्य काव्यस्य संशोधनाधारभूतौ पत्रात्मकौ द्वावादर्शौ । तयोरेकः त्रिवाङ्कूर-विश्वविद्यालयाधिकृतहस्तलिखितग्रन्थशालास्वामिकः देवनागरलिपिः अशुद्धिबहुलः । अन्यः मत्पितृपादैः सम्पादितः केरलीयलिपिः प्रायः शुद्धः । एतत्काव्यप्रकाशनविषय उदारं साह्यं कृतवद्भ्यः त्रिवाङ्कूरविश्वविद्यालयाधिकृतेभ्यो बहुकं धारयामः ।

तदिदं काव्यं न केवलं कर्तृबहुमानाद् यावन्निकामं प्रतिपाद्यमाहात्म्याच्च यथामति संशोध्य मुद्राप्य सज्जनसमक्षमवतार्यते, येन नीरक्षीरन्यायतो गुणपक्षपातिनां सतामभिनन्दनानुग्रहोऽस्मिन् प्रसजेत् ।

अनन्तशयनम्
२५-६-१९५७

इति वयम्,
वे. वेङ्कटरामशर्मा विद्याभूषणः.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्री ॥

परमेश्वरशिवद्विजविरचितम्

आश्लेषानक्षत्रजात–

श्रीरामवर्ममहाराजचरित्रं काव्यम्.

प्रथमः सर्गः.

मङ्गलाचरणम्—

श्रियः पतिं स्वात्मनि तल्पके वहन् यमक्षराम्नायमयं फणीश्वरः ।
समातनोद् व्याकृतिभाष्यमद्भुतं पदं तदीयं शिरसा वहाम्यहम् ॥ १ ॥

उदाहरिष्यमाणानां सूत्राणामक्षराम्नायमूलत्वं मङ्गले ध्वनितम् । 'श्रियः पदं सन्दधदात्मना विभुं यमक्षरा' इति 'तदीयं शुभदं वहा' इति च पाठः ।

एतत्काव्यनायकस्य आश्लेषानक्षत्रजातश्रीरामवर्ममहाराजस्य गुणोदयवर्णनम्—

गुणान् सवृद्धीन् प्रथयन् स्वया दृशा विभाति वर्णैः पृथगीड्यया त्रिभिः ।
पदागमः किं गुणवृद्धिवाचकैश्चतुर्षु वर्णेषु स वञ्चिभूपतिः ॥ २ ॥

वृद्धिरादैच् । अदेङ्गुणः । इको गुणवृद्धी ।

स पद्मनाभस्य कृपाकुले कुले लसद्गुणाश्लेषविशुद्धतारके ।
कृतावतारः खलु रामसंज्ञया स्वनामसाधर्म्यसुयोजयैधते ॥ ३ ॥

पूर्वसूत्रोदाहरणम् । 'स्वरामसा' इति च पाठः ।

अलोलुपः शर्म वशी निषेवते मरीमृजात्मा च निषिद्धवर्जनात् ।
दिशां यशोभिः परिमृष्टमूर्तिभिः कविस्तुतैर्जिष्णुररातिमाथिभिः ॥ ४ ॥

न धातुलोप आर्धधातुके । क्ङिति च ।

लसन्त्यनन्ताधिपतेरमिश्रिता गुणास्त्वनन्ता विदुषोऽस्य दोषकैः ।
विभोरनन्तस्य जितस्य भूभृतौ हलात्मसंयोगविधा समत्सराः ॥ ५ ॥

हलोऽनन्तराः संयोगः । 'भूभृतो हला' इति च पाठः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बुधैः कवीन्द्रैः सह सूर्यमत्सरी सदोदितः क्वापि स गायकादृतः ।
परे हि शुद्धा मुखनासिकाश्रयो वर्णः क्वचित् स्यादनुनासिकः शुचिः ॥

मुखनासिकावचनोऽनुनासिकः । 'क शुभः' इति च पाठः ।

सुधर्मभूस्थानमतीव शोभनं सतां प्रयत्नोऽवनमेव पावनम् ।
अतोऽस्य सावर्ण्यमभूद् विडौजसा स्फुटं समस्थानकयत्नकल्पितम् ॥ ७ ॥

तुल्यास्यप्रयत्नं सवर्णम् ।

पती इमौ घस्रनिशोः प्रभू उभौ सुतेजसां तस्य यशोभिरोजसा ।
जितौ वलेते अतिदूरसारिताविह प्रकृत्याश्रयतोपलिप्सया ॥ ८ ॥

ईदूदेद्द्विवचनं प्रगृह्यम् ।

अहो अमी अस्य गुणाः समुज्ज्वला विसृत्य भानोरिव भानवोऽनुगाः ।
प्रचेतयन्त्याशु जडानपि प्रभुर्महाप्रभावः स कथं नु कथ्यते ॥ ९ ॥

अदसो मात् । ओत् ।

भजन्ति सङ्ख्यावदधीशसश्रयाः सुखेन तावद् बहुशः श्रितश्रियः ।
तमद्य भास्वन्तमिवाम्बुजव्रजाः समस्तदोषान्तविधायकोदयम् ॥ १० ॥

बहुगणवतुडति संख्या ।

स सर्वनामोचितसत्पदाश्रयाद् विशेषशाली नियतौजसादिषु ।
परेऽपि सर्वे प्रगृणन्ति यद्गुणानमुष्य सर्वत्र निवृत्तमत्सराः ॥ ११ ॥

सर्वादीनि सर्वनामानि ।

स्वराद्यमास्तां पदमव्ययं पुमान् क तद्धितः सर्वविभक्तिवर्जितः ।
अमुष्य राज्यं पुनरुच्चकैः सनादनल्पसन्तानसुखं यतस्ततः ॥ १२ ॥

स्वरादिनिपातमव्ययम् । तद्धितश्चासर्वविभक्तिः ।

पदे यदादेश इहानलाश्रयः प्रवर्त्तते स्थानिवदेव कार्यकृत् ।
तृणाय मन्येत विनीतिवर्जितो जनो जनाधीशमशक्तशासनम् ॥ १३ ॥

स्थानिवदादेशोऽनल्विधौ ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुखाय शास्त्राणि समध्यगीषत द्विजाः क्लिशित्वा सुशुभानि यानि सः ।
विभाति तेषां निकषोन्मिषद्द्युषन्मिषेण चिन्तामणिरेव भूपतेः ॥ १४ ॥

गाङ्कुटादिभ्योऽञ्णिन्ङित् । मृडमृधगुधकुषक्लिशवदवसः क्त्वा ।

चिचीषतो धर्मगणं स्वशर्मणे बिभित्सतो विष्वगधर्मकल्मषम् ।
अमुष्य यत्रक्कच नीतिसम्मतः प्रजासु दण्डोऽपि दयोदयोऽभवत् ॥ १५ ॥

इको झल् । हलन्ताच्च ।

समाश्रयाः पात्रनकर्मधारया महीक्षिता तत्पुरुषाश्चकासति ।
सितोज्ज्वला वृत्तमनोज्ञमण्डलप्रभासिना चन्द्रमसेव तारकाः ॥ १६ ॥

तत्पुरुषः समानाधिकरणः कर्मधारयः ।

प्रभूतरीण्येव गृहाणि देहिनां तदीयराज्ये स्वगुणैरतिद्युनि ।
अनल्पदुग्धोत्तमगूनि चाभवन् प्रकृष्टविद्याः सदयाश्च मानवाः ॥ १७ ॥

ह्रस्वो नपुंसके प्रातिपदिकस्य । गोस्त्रियोरुपसर्जनस्य ।

प्रशस्तिमापुर्निषधाः कलिङ्गकाः समृद्धिहेतोर्यदवीक्षिणां नृणाम् ।
द्विजो भुजोत्थोऽप्यथवोरुजोऽन्त्यजस्ततोऽत्र गत्वा सुखिनो वसन्ति यत् ॥

लुपि युक्तवद् व्यक्तिवचने ।

स्त्रियश्च पुंसः सति गौरवे पितॄन् समस्थितान् भ्रातृजनानमंस्त सः ।
तथैव पुत्रानपि नैव्यसम्भवे महामतिः सर्वजनीनचेष्टितः ॥ १९ ॥

सरूपाणामेकशेष एकविभक्तौ ।

निरीक्ष्य भूवादिषु धातुषु प्रियप्रसाधकेषु क्षितिपेष्वसाधुताम् ।
विधाय तान् प्रत्ययरूपिणात्मसात् पदेषु सर्वोपरि भास्यतेऽमुना ॥ २० ॥

भूवादयो धातवः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हृतोऽधिकारः स्वरितेन मौक्तिकस्रजां समाक्रम्य गलं दिवौकसाम् ।
यदीयकीर्त्तिप्रकरेण भूयसा गुणप्रयुक्तेन वलक्षरोचिषा ॥ २१ ॥

स्वरितेनाधिकारः ।

परान्वयोत्थोऽपि गुणी समेधते यदाश्रयः स्वोऽपि विदूयते परः ।
निषेव्यते जायुररण्यजो जनैर्निदह्यते देहभवोऽपि हि व्रणः ॥ २२ ॥

अनुदात्तङित आत्मनेपदम् ।

प्रभूतशक्त्या क्षमयाभिनन्द्यया गतस्मयाभ्यामपि यत्र भास्यते ।
उदारताभ्यां सुजनोन्मुखैर्धनैर्गुणैः किमस्मिन् विधुता विरोधिता ॥ २३ ॥

भावकर्मणोः ।

महीमघोनो हृदयं दयोदयं करौ शुनासीरतरू नताकरौ ।
गिरश्च पीयूषजसारभासुरा जनावनार्थं व्यतिभातकेतराम् ॥ २४ ॥

कर्त्तरि कर्मव्यतीहारे ।

न चास्य मौढ्याद् व्यतियान्त्यकर्मणे जना व्यतिघ्नतसु परेषु वा भृशम् ।
परस्परस्य व्यतिभान्त्यतन्द्रिता गुणास्तु तेषामखिलेष्टकर्मणि ॥ २५ ॥

न गतिहिंसार्थेभ्यः । इतरेतरान्योन्योपपदाच्च ।

वनान्तरं या न्यविशन्त चीवरं चिरादवाक्रीणत मौक्तिकस्रजैः ।
रिपुस्त्रियोऽस्य व्यजयन्त धावने मृगीर्दृगाभाप्तभूरिमत्सराः ॥ २६ ॥

नेर्विशः । परिव्यवेभ्यः क्रियः । विपराभ्यां जेः ।

न बाल्यलौल्येऽपि परावमाननैरसौ समाक्रीडत सात्त्विकोत्तमः ।
अनाददानोऽपि कथां परस्त्रियां पृथु प्रथीयान् भविकेऽवतिष्ठते ॥ २७ ॥

क्रीडोऽनुसंपरिभ्यश्च । समवप्रविभ्यः स्थः । 'अनाददानोऽन्यवधूकथां परस्त्रियां प्रथी' इति च पाठः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मनोभवोऽकीर्तिमनङ्गतोद्भवां निरुद्धवान् प्रागनिरुद्धसंज्ञया ।
चिराय सोऽद्याप्युदतिष्ठतात्र किं नृपात्मना भुव्युपतिष्ठते यतः ॥ ॥ २८ ॥

उदोऽनूर्ध्वकर्मणि । अकर्मकाच्च । 'प्राह निरुद्धताततताम् । उपेत्य सो' इति च पाठः ।

मृदुस्मितेनोत्तपमानमाननं विलोक्य तस्य क्रममाणमानसाः ।
श्रियेन्दुसाम्यं वदमानमङ्गनाः समुच्चरन्तेऽङ्गजचोदितास्त्रपाम् ॥ २९ ॥

उद्विभ्यां तपः । वृत्तिसर्गतायनेषु क्रमः । भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः । उदश्चरः सकर्मकात् ।

हयेन तं सञ्चरमाणमादराद् विलोक्य लोकाभरणं सुलोचनाः ।
न सम्प्रयच्छेमहि नोऽन्यवस्तुना ध्रुवं दृशोऽस्मादिति नाहरन्ति ताः॥३०॥

समस्तृतीयायुक्तात् । दाणश्च सा चेच्चतुर्थ्यर्थे ।

अमूषु रोमाञ्चमिषात्तदन्तरे स पञ्चबाणः शरसञ्चयान् किरन् ।
सुस्मूर्षमाणो नृपसाम्यमत्सरं भृशं तदासक्ततया जिघांसति ॥ ३१ ॥

ज्ञाश्रुस्मृदृशां सनः ।

शरान् प्रयुङ्क्ते न न संक्ष्णुते क्वचित् स्मरोऽयमासेचनकाकृतिस्तु नः ।
स्वयं सुखं दर्शयतेऽथवाप्यहो भृशं निहन्तीति वदन्ति ताः स्त्रियः॥३२॥

समः क्ष्णुवः ।

जनान् स विस्मापयतेऽद्भुताकृतिर्मनः पुनर्गर्धयते च पश्यताम् ।
इति प्रभुं लापयमानमङ्गना गुणैर्हृदन्ते खलु कुर्वते निधिम् ॥ ३३ ॥

भीस्म्योर्हेतुभये । गृधिवञ्च्योः प्रलम्भने ।लियः सम्माननशालीनीकरणयोश्च ।

मनोपथेनैव करोति कुत्रचिन्नृपो जितात्क्षः स दशेन्द्रियानुगम् ।
न जानते ये विकृतिं भवोद्भवां हृषीकवर्गः खलु तान् प्रबाधते ॥ ३४ ॥

स्वरितञितः कर्त्रभिप्राये क्रियाफले ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृतं परस्मैपदमद्य कर्त्तरि स्थितेन शेषात् कमलापतौ शुभम् ।
इतीव मत्वा निजवंश्विभूपदं नृपः करोति स्म स पद्मनाभसात् ॥ ३५ ॥

शेषात् कर्त्तरि परस्मैपदम् ।

बलादधर्मो परिमृष्यतामुना हतावकाशो विरराम सर्वतः ।
चकास्ति धर्मोऽप्यथ मेदुराकृतिर्हरेर्वशात् सोऽपि कलिः कृतायते ॥३६॥

परेर्मृषः । व्याङ्परिभ्यो रमः ।

यतः क्वचिद् विप्रतिषेधसम्भवे परं तु कार्यं न्विति पाणिनीरितम् ।
ततस्त्रिवर्गं सविरोधमाक्षिपन् नृपः परे ब्रह्मणि तत्परः किमु ॥ ३७ ॥

विप्रतिषेधे परं कार्यम् ।

ध्रुवं त्वपादानमपायसम्भवे प्रपश्यतां स्पष्टमुपायसम्भवे ।
मतं समादानमितीदमाचरन् नृपोऽकरोत्तत्त्वपदानगोचरम् ॥ ३८ ॥

ध्रुवमपायेऽपादानम् ।

बिभेति यस्मात् सततं महाजनः पराजितोऽस्मात् स च षड्रिपुव्रजः ।
जनात् किमन्तर्दधतेऽस्य चान्यथा कथं कथाप्यस्य न सम्भवेदिह ॥३९॥

भीत्रार्थानां भयहेतुः । पराजेरसोढः । अन्तर्धौ येनादर्शनमिच्छति ।

जनिप्रकर्त्तुः प्रकृतिं परं विदन् प्रजा च तस्माद्भवतीति संस्मरन् ।
सदा परे ब्रह्मणि सक्तवान् नृपः स्वधर्मबुध्द्या दयितायते भुवः ॥ ४० ॥

जनिकर्त्तुः प्रकृतिः ।

यौवराज्याधिपत्यात् प्रभृति निर्वृत्तान् वृत्तान्तान् कथयितुं राजगृहे भजनशालायां नायकस्यागमनकथनं भजनशालावर्णनं च—

अथास्य पद्मैर्हरिकीर्त्तिभूषितं युवाधिपत्यादिचरित्रमुच्यते ।
मुदं प्रदातुं मनसे मयाधुना कथागुणास्तस्य तथाविधा ननु ॥ ४१ ॥

कर्मणा यमभिप्रैति स सम्प्रदानम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स रोचमानं मनसे शुभासनं प्रसादनाढ्यं बहुभूतिभूषणम् ।
अशिश्रयच्छ्रीपतिसेवनालयं यतिभ्रमात् किं नृपतिर्महामतिः ॥ ४२ ॥

रुच्यर्थानां प्रीयमाणः ।

अनारतं श्लाघत आदृतश्रियै शुभाय यस्मै खलु धन्यसञ्चयः ।
कृतोपमोऽसौ वसुदेवलालितः पुरेऽलकाख्ये च हरौ तदालयः ॥ ४३ ॥

श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः ।

समादृतो धारयतेऽखिलेप्सितं सदैव तस्मै स मुकुन्दसन्निधिः ।
भिदास्य वा पुण्यजनावृतस्य किं पुराद्धनेशस्य सिताद्रिशोभितात् ॥४४॥

धारेरुत्तमर्णः ।

सदैव येभ्यः स्पृहयन्ति साधवो जनाः प्रराध्यन्ति भृशं तथेतरे ।
गणैर्गुणानामिव सत्त्वजन्मनां शरीरिणां तस्य नरैः समावृतम् ॥ ४५ ॥

स्पृहेरीप्सितः । राधीक्ष्योर्यस्य विप्रश्नः ।

यदुच्यते यत् करणं सुसाधकं सुरालयद्वैरिति युज्यते हि तत् ।
यतो दिवः कर्म च तन्यतेऽमुना समृद्धिभिः स्वैस्त्रिबुधेन्द्रतोषणम् ॥ ४६ ॥

साधकतमं करणम् । दिवः कर्म च ।

मुदाधितिष्ठन्तमधोक्षजान्तिकं शुचिप्रभं भागवताधिकादृतम् ।
मनोहरं श्रीपतिनामसंस्तवैस्तमावसत्युत्तमभक्तलक्षणम् ॥ ४७ ॥

अधिशीङ्स्थासां कर्म । उपान्वध्याङ् वसः ।

अयं स्वतन्त्रोऽखिलसौधनिर्जयादितीह धात्राभिहितास्य कर्तृता ।
समस्तनेत्राहरणे ततोऽमुना नृपेण नूनं प्रथमाश्रयः कृतः ॥ ४८ ॥

स्वतन्त्रः कर्ता ।

सदोररीकृत्य मुदात्समीप्सितं वसन्ति यस्मात् सुजना द्विजादयः ।
परिच्छदाढ्यः सुमनोविभूषितः व्रतत्युपेतः स सुरद्रुमोपमः ॥ ४९ ॥

ऊर्यादिच्विडाचश्च ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जनाः स्म सत्कृत्य यतो निवासिता गुणैरलङ्कृत्य तु ये समागताः ।
न वस्तुमात्रं भुवनेषु मह्यते पुनः कणेहत्य तु तद्गुणोत्करः ॥ ५० ॥

आदरानादरयोः सदसती । भूषणेऽलम् । कणेमनसी श्रद्धाप्रतीघाते ।

यदा श्रितान् श्रीहरिमन्दिरान्तराद् विनिर्गतस्तत्तुलसीकसौरभम् ।
मरुत् पुरस्कृत्य सुखाकरोत्यलं नृपाश्रितानामुपदामिवाचरन् ॥ ५१ ॥

पुरोऽव्ययम् ।

यतः स्थिता विष्णुनिकेतनोद्गतैः स्तवैर्निपाठैरनिशं श्रवोध्वना ।
मनोमलेऽच्छोद्य हते विपातका विभान्ति तारागतनीरदा इव ॥ ५२ ॥

अच्छ गत्यर्थवदेषु ।

हरेरलब्धावसराः समर्चने सुरास्तिरोभूय यदीयसौधगाः ।
सुखेन विश्रम्य वसन्ति निर्गतस्वधामविश्लेषशुचस्तदा तदा ॥ ५३ ॥

तिरोऽन्तर्धौ ।

अधोक्षजाग्रस्थितहेमकेतनप्रभाप्ररोहैः परितः प्रसाधनात् ।
सुरालयस्योरसिकृत्य यः प्रभां विभाति रुद्राद्रिसितात्मकोप्यहो ॥ ५४ ॥

अनत्याधान उरसिमनसी ।

अमुं पदेकृत्य स सेवनालयं निजानुरूपं युववन्निभूपतिः ।
विधुं विकुण्ठे विधुशेखरं गिरौ सिते च सत्ये विधिमन्वगात् स्थितम् ॥

मध्ये पदे निवचने च ।

क्षणार्धनिर्वर्तितयौवराज्यकः समस्तकृत्यैः समितो बृहस्पतेः ।
स जीविकाकृत्य पदाम्बुजं हरेश्चिराय भाति स्म विशालयन् यशः ॥

जीविकोपनिषदावौपम्ये ।

मनीषिणोन्वच्युतसेवनालयप्रवेशमागत्य युवावनीशितुः ।
तदीयधामान्ववसाय निर्वृताश्चकोरवृन्दान्युदिते यथा विधौ ॥ ५७ ॥

अनुर्लक्षणे । तृतीयार्थे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बभूवुरत्राप्युपनु क्षमापतिं सुमान्यसामान्यमुपापि पण्डिताः ।
यदस्य कारुण्यकटाक्षमानिताः प्रशस्तिमापुः सह ते समृद्धिभिः ॥ ५८ ॥

हीने । उपोऽधिके च ।

चरन्ति येभ्यः परि पापवृत्तयो महीसुरास्ते कुलशीलशालिनः ।
बभुः सुवृत्तं तमुपेत्य भूपतिं दिनेश्वरं भास इवोदयाद्रिगम् ॥ ५९ ॥

अपपरी वर्जने ।

समृद्धियुक्तं विदुषे प्रलोभतश्चलः परस्मै पदमर्पयेत् कथम् ।
नृपस्तु धीरो दिवि चात्मनेपदं प्रसाधयन् स्थानशतं प्रदत्तवान् ॥ ६० ॥

लः परस्मैपदम् ।

तदा बभासे प्रथमो मनीषिणां नृपेशपार्श्वे पुरुषस्तथोत्तमः ।
स मध्यमः कुत्र च मध्यतो भवन्न चाधमस्तत्र हि लब्धवान् पदम् ॥ ६१॥

तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः ।

पदद्वये चास्य विभक्तयः पुनः पृथक्त्रयैकद्विबहूक्तिखण्डनात् ।
प्रपेदिरेऽनेकपदप्रचारितां विभक्तिहीनो हि भवेदनर्थवान् ॥ ६२ ॥

तान्येकवचनद्विवचनबहुवचनान्येकशः । विभक्तिश्च ।

इहैहिमन्ये नु जयेः प्रभोः सभां लघुर्हि सेत्यादिविहासतत्पराः ।
परस्परं जागृपयःस्वशिक्षिते बुधा विलम्बं च विजानते हितम् ॥ ६३ ॥

प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च ।

कर्तारं चिरमिह युष्मदस्मदर्थं श्रित्वासन् त्रिभुवनमध्यमोत्तमास्तम् ।
शेषोऽपि प्रथमहितोऽभवद् दयालोर्वार्ताभूदिति विदुषां मिथः सहर्षम् ॥

शेषे प्रथमः ।

बहुविधगुणवृद्धिज्ञापकः सन्निकर्षः पर इह तु यदीयः संहितापादकश्च ।
स खलु नृपवरीयानेष जैवातृकः स्यादिति जगदुरभिज्ञाः पूर्णजैवातृकास्यः ॥

परः सन्निकर्षः संहिता ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति महितचरित्रस्तत्र शास्त्रैकतानः पदमलमकरोत् स्वं यौवराज्योपपन्नम् ।
प्रणयविनयशाली मातुले भूपमौलौ सदृशसहजयुक्तो भक्तिमान् पद्मनाभे ॥

आश्लेषिकाभविहितावतरस्य मान्यश्रीवञ्चिभूमितिलकस्य महामहिम्नः ।
श्रीरामवर्मवसुधाधिपतेश्चरित्रे सर्गोऽत्र सूत्रमिलितः प्रथमो गतोऽभूत् ॥

इति श्रीरामवर्ममहाराजचरित्रे प्रथमः सर्गः.

अथ द्वितीयः सर्गः.

विशाखभूपवर्णनम् —

अथानुजातोऽस्य विशाखभूपो विशाखशूरः सुरशाख्युदारः ।
विभाति सुश्लोककरः पदानां विधिः समर्थः प्रचकास्ति यस्मिन् ॥ १ ॥

समर्थः पदविधिः ।

अधिक्षितीशं सकलाः कलाश्च यथाक्रमं प्रापुरिवानुरागात् ।
जाता महीक्षित्कुलशेखरस्य वंशे न केषां स्पृहणीयशीलाः ॥ २ ॥

अव्ययीभावश्च ।

तौ पुष्पवन्तौ कुलशेखराख्यमहीपतिर्विष्णुपदैकतानाः ।
तदन्वयास्तत्पुरुषाश्च शस्ताः प्रायः प्रसिद्धिर्हि महच्छ्रितानाम् ॥ ३ ॥

तत्पुरुषः ।

श्रुत्यन्तविश्रान्तविलोचनोऽसौ सुहृत्स्वहृद्भ्यां द्विगुरन्यथापि ।
तयोः परोक्षस्य सुदुर्लभत्वाद् यथाविधं पश्यति लोकवार्त्ताम् ॥ ४ ॥

द्विगुश्च । यथाऽसादृश्ये । 'श्रोत्रान्तवि' इति च पाठः ।

वञ्चीन्द्रपश्चास्यममुं निशम्य परे तु पूर्वक्षितिपालभीताः ।
वनं श्रिता अप्यवनातिसक्ता भवन्ति दावेन विनापि दग्धाः ॥ ५ ॥

उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राशीकृतान् रूपमुखान् गुणौघान् श्यामाः समाकर्ण्य तदुन्मनस्काः ।
प्राप्ता वियोगोद्भवपाण्डिमानं वभुः प्रलिप्ता इव तद्यशोभिः ॥ ६ ॥

श्रेण्यादयः कृतादिभिः ।

अभूतदानादुचिताप्रदानात् कृताकृतत्वं विमृशन् सुरद्रौ ।
विशेषतः पल्लवपञ्चशाखं विशाखभूपं विदधे विधाता ॥ ७ ॥

क्तेन नञ्विशिष्टेनानञ् ।

स पद्मनाभस्य कलेव जातो महापुमानात्मकुलेश्वरस्य ।
बुधाभिवन्द्यो वलिदर्पहारी पद्मेक्षणो यत् सरसो धृतश्रीः ॥ ८ ॥

सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः ।

एवंगुणः सर्वहितेऽनुगच्छन् नरेन्द्रवृन्दारकमग्रजातम् ।
प्रेमेव तस्य प्रगृहीतदेहं सतां सदा सौख्यकरोऽस्त्युदारः ॥ ९ ॥

वृन्दारकनागकुञ्जरैः पूज्यमानम् ।

अकिंमतित्वादखिलेष्टकारी तं यौवराज्ये कृतवान् सरूपम् ।
प्रदीप्तसाहस्रकरोऽपि भास्वान् नैवान्तरेणारुणमभ्युदेति ॥ १० ॥

किं क्षेपे ।

पूर्णा महीभर्त्तरि सा च लक्ष्मीरंशेन तत्तुल्यगुणं तमागात् ।
गुणप्रलोभात् कमलप्रियापि नेन्दीवरं क्वापि जहाति काले ॥ ११ ॥

कृत्यतुल्याख्या अजात्या ।

चरन्नुदीच्यां दिशि पुण्यलिप्सुः सुखेन सर्वैर्बहुमानितोऽभूत् ।
असौ कुमारश्रमणादिभिश्च वञ्चीश्वराः सर्वविदः क्व नेड्याः ॥ १२ ॥

कुमारः श्रमणादिभिः ।

उच्चावचानेकगुणैकधाम्नोः श्रीरामनाम्नोः कृतशास्त्रसीम्नोः ।
तयोर्जनास्त्वग्रजमेव रामं प्रेमक्रमाल्लक्ष्मणमाहुरन्यम् ॥ १३ ॥

मयूरव्यंसकादयश्च ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तं पूर्वकायाद् विनयावनम्राज्ज्यायोऽग्रतो वेत्ति जनोऽनुजातम् ।
सुरूपयोः सर्वसरूपयोश्च भिदैतयोर्नेतरथावगम्या ॥ १४ ॥

पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे ।

भजनशालायां ज्येष्ठं साक्षात् सम्भावयितुं विशाखभूपस्य प्रस्थानकथनं प्रभातवर्णनं च —

पूर्वं तु सोऽनाप्तयुवाधिपत्यो ज्यायांसमारूढयुवाधिपत्यम् ।
विवन्दिषुर्वन्दनमन्दिरस्थं स्वकैः प्रभाते सहितः प्रपेदे ॥ १५ ॥

प्राप्तापन्ने च द्वितीयया । 'त्यो वर्षीयसं प्राप्तयु' इति च पाठः ।

प्रभातलक्ष्मीर्द्व्यहजातपद्ममालोदितामोदविमोदिताशा ।
प्रदर्शयन्त्यर्कसुवर्णकुम्भं तमासिषेवे शकुनप्रदेव ॥ १६ ॥

कालाः परिमाणिना । 'शकुनाहृतेव' इति च पाठः ।

अतामसानां नयनानि नृणां समं सरोजैर्जहति स्म निद्राम् ।
उत्कम्पितानीव कनीनिकाभिर्भ्रमद्द्विरेफभ्रमकारिणीभिः ॥ १७ ॥

नञ् । 'भ्रमद्विरेफ' इति च पाठः ।

कराभिमर्शाद् दिननेतुरीषद्रागोज्ज्वलायां दिशि तावदैन्द्र्याम् ।
तिरोदधुस्तत्र तु तारकाः किं तदानुकूल्यं प्रविधातुकामाः ॥ १८ ॥

ईषदकृता । 'ल्यं विदधातुकामाः' इति च पाठः ।

गवां गणश्चापि सवत्सकानां वत्सोत्सुको दोहनदेशमागात् ।
शेषो बहुव्रीहितृणादिसक्तो गृहाङ्कणेषु व्यचरद् यथेष्टम् ॥ १९ ॥

शेषो बहुव्रीहिः ।

रेजुः सभृङ्गाणि सरोरुहाणि गरुन्मरुत्पातविकम्पितानि ।
डोलाश्वनाद् भृङ्गशिशून् सलीलं प्रस्वापयन्तीव रुतैः शकुन्ताः ॥ २० ॥

तेन सहेति तुल्ययोगे । 'रेजुर्द्विरेफाः कमलोदरेषु गरु' इति 'विकम्पितेषु' इति 'श्वनात् किं शिशवः सली' इति 'प्रस्वाप्यमानाः सुरुतैः' इति च पाठः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्रजं स्रजं भूपगृहेऽन्तरेण कुप्येषु दीपास्त्ववसन् प्रभाते ।
प्रभापहर्त्तुर्द्युमणेः प्रभीता गुहाप्रलीना इव मन्दभासः ॥ २१ ॥

अन्तरान्तरेण युक्ते ।

सरोजिनीवर्णनम् —

तदा तमिस्रां प्रवसत्यभीष्टे सरोजिनी सम्प्रति जीवनाथे ।
धृतादरात्मानमभूषयत् स्वं विभूषणैर्वासकसज्जिकेव ॥ २२ ॥

कालाध्वनोरत्यन्तसंयोगे । 'सन्त्यभी' इति 'यत् स्वैर्विभूषणै' इति च पाठः ।

नीरन्ध्रनीलच्छविलोभनीयैर्विकासिसूनावलिपुष्टशोभैः ।
स्निग्धाम्बुलग्नैरलसत् तदा सा शैवालजालैः प्रति केशवेशात् ॥ २३ ॥

प्रतिनिधिप्रतिदाने च यस्मात् ।

भक्ष्याय यान्तीं जलनीलिकायामेषा विलासेन चिलीचिमानाम् ।
रेखां शिशूतां विभराम्बभूव सीमन्तसिन्दूररुचिं वहन्तीम् ॥ २४ ॥

क्रियार्थोपपदस्य च कर्मणि स्थानिनः ।

अमन्दनिर्यद्भ्रमराभिलक्ष्यप्रसन्नपङ्केरुहचारुवक्त्राम् ।
कटाक्षमोक्षान् बहु कुर्वतीव कामाय कल्पेत न कस्य पुंसः ॥ २५ ॥

तुमर्थाच्च भाववचनात् ।

उड्डीयमानाभिरितस्ततश्च विलासहेतोर्विसकण्ठिकाभिः ।
अलोकि लोकेन लसत्स्मितेव विलोचनैः कौतुकनिर्निमेषैः ॥ २६ ॥

कर्तृकरणयोस्तृतीया ।

विचित्रपत्राश्रयचक्रवाकप्रकल्पितोच्चस्तनमण्डलासौ ।
पत्रान्तरोद्भासिततोयबिन्दुमुक्ताकलापैः सह सम्बभासे ॥ २७ ॥

सहयुक्तेऽप्रधाने । 'मण्डला सा' इति च पाठः ।

जलार्धभागप्रतिबिम्बितेन रक्तेन निष्कासितसैकतेन ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रेजे नभः पूर्वदलेन कामाद् विस्रस्तवस्त्रा जघनादिवासौ ॥ २८ ॥

हेतौ ।

निरीक्ष्य लक्ष्मीं कमलेषु पुष्टां निमीलितैस्तावदसूययेव ।
ऋते प्रसादेन मुखेऽतिकामात् करम्बिताङ्गी किमु कैरवौघैः ॥ २९ ॥

अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते ।

तरङ्गकारी सरसः समीरः सहायभूतो नलिनप्रबोधे ।
तदीयनिःश्वास इव प्रयातुर्मन्दं पुरस्तान्नृपतेश्चचार ॥ ३० ॥

षष्ठ्यतसर्थप्रत्ययेन ।

प्रस्थानवर्णनम् —

गच्छन् जगत्याः पतिरध्वदैर्घ्यं श्रीपद्मनाभालयपार्श्वमार्गे ।
कर्णान्तरापूर्णनिपाठविष्णुस्तोत्रामृतास्वादपरो न वेद ॥ ३१ ॥

एनपा द्वितीया (?)।

कल्यः स काल्यश्रियमेवमश्नन् क्रमात् समीपं युवराजधान्याः ।
नेत्रैः सुनेत्राभिरभिप्रपीतगात्रोऽगमद्धर्म्यतलस्थिताभिः ॥ ३२ ॥

दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् ।

अथोचिताचारपरैर्विनीत्या प्राकारदौवारिकभृत्यवर्गैः ।
दूरे स्थितैः सम्प्रतिपादितेन भेरीनिनादेन सहान्तरागात् ॥ ३३ ॥

सप्तम्यधिकरणे च ।

भजनशालायां वन्दिकृतदेवस्तवानन्तरं पूर्वराजस्तवप्रसङ्गाद् वन्दिभिः कथितं ९३३ तमे कोलम्वहायने स्वर्गतस्य वालमार्ताण्डनृपतेर्वीरकथादिकं शृण्वन्नवस्थित इति सन्दर्भमुपक्षिप्य तस्य राज्ञो गुणोत्कर्षवर्णनम् —

लताभिरध्वोपरि वर्धिताभिः सुगन्धिसूनैरवकीर्यमाणः ।
लाजैरिव स्त्रीभिरथ स्तुवत्सु समासदद् वन्दिवरेषु गेहम् ॥ ३४ ॥

यस्य च भावेन भावलक्षणम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्मिन् नृणां स्वामिनि सम्प्रविष्टे देवस्तत्रानन्तरसम्प्रवृत्ताः ।
वार्तास्तु वीरक्षितिपालवीर्यसमावृता वन्दिमुखान्निरीयुः ॥ ३५ ॥

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च ।

तेषां नृपाणां महनीयकीर्त्तिं श्रीवीरमार्त्तण्डनृपं स्ववंश्यम् ।
प्रस्तावमध्यापतितं निशम्य स कौतुकाक्रान्तमना बभूव ॥ ३६ ॥

यतश्च निर्धारणम् ।

भावं तदा हर्षुलमानसस्य भूभृत्कुमारस्य विभाव्य तुष्टाः ।
निन्युर्विकासं निपुणाः कथासु शिष्टानुशिष्टामदसीयगाथाम् ॥ ३७ ॥

साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः ।

विज्ञस्य राज्ञः श्रवणाभिलाषः पद्यैः सुहृद्यैः प्रसितानसूंश्च ।
न्यमज्जयन्मोदसुधापयोधौ वित्तं हि वेत्ता सरसः प्रयोक्तुः ॥ ३८ ॥

प्रसितोत्सुकाभ्यां तृतीया च ।

वीरस्य मार्त्तण्डमहीमघोनस्तेषामुदीयुः स्मरतां मुखेभ्यः ।
वृत्तानि तं मानयतां वसन्तं द्रुभ्यः सुमानीव गलन्मधूनि ॥ ३९ ॥

अधीगर्थदयेशां कर्मणि ।

आसीदसीमप्रसरत्स्वतेजोनिष्कासिताराततमोविकारः ।
भर्त्ता भुवो वञ्चिमहीशवंशे मार्त्तण्डनामा महनीयकीर्त्तिः ॥ ४० ॥

कर्तृकर्मणोः कृति ।

नृणां मतेष्वत्र नृपेषु सोऽभूच्छ्रीवत्सलक्ष्माश्रयणात् प्रशस्तः ।
अब्धेस्तु वस्तूत्करवास्तुनोऽपि जातेष्वलं कौस्तुभ एव शस्तः ॥ ४१ ॥

क्तस्य च वर्तमाने ।

बुद्ध्वा परेषां परितः समृद्धिं पृथ्वीपतिस्तानुदयुङ्क्त हन्तुम् ।
नृणामसह्यानि तमांस्यनिघ्नन् कदापि नोदेति मयूखमाली ॥ ४२ ॥

कृत्यानां कर्तरि वा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स जिष्णुना तुल्यबलोऽपि जिष्णुरलिप्सतामोघगुमेशतोषम्।
चक्रं जिगीषोर्हि मनोरथस्य दैवी कृपैकं प्रभुशक्तिरन्यत् ॥ ४३ ॥

तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्।

भूयात् प्रजाभ्यः सुखमित्यधीशो शुभो भवं भावुकमाससेवे ।
नैवात्मतापं गणयन्ति पुण्याः प्रगृह्णवो लोकहिताभिवृद्धौ ॥ ४४ ॥

चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः ।

शुचीन्द्रक्षेत्रवर्णनं खड्गमुद्रालाभकथनं च —

त्रिमूर्त्ति भेजे स शुचीन्द्रदेवं सदैव देवाभिवृतं नृदेवः ।
शचीपतिर्यत्र शुचोऽघजातास्त्यक्त्वा शुचिः सन् स्वरुचा चकाशे ॥

द्विगुरेकवचनम् ।

कुम्भोद्भवोपज्ञमसौ मखास्त्रीं जम्भारिणा च प्रथितः पृथिव्याम् ।
शम्भुः स शं भावयतान्समेति सम्भावितोऽभून्नृवरेण भक्त्या ॥ ४६ ॥

उपज्ञोपक्रमं तदाद्याचिख्यासायाम ।

क्षेमं विधास्यन् नृसभेष्वगस्त्यो यद् दाक्षिणात्येष्वसमेक्षणस्य ।
समातनोद् दक्षिणमेतदाहुः कैलासमिष्टार्पणदक्षिणत्वात् ॥ ४७ ॥

अशाला च ।

बध्नन्ति यस्मिन्नपथान्निवार्य बुद्धिं दृढां स्थाणुधियेव गां यत् ।
अतोऽभवत् स्थाणुरिति प्रसिद्धस्तदीश्वरो विश्वहितप्रदाश्वान् ॥ ४८ ॥

अपथं नपुंसकम् ।

तथाप्यनुज्झन्नृषिचित्तमीशो मोदात् सदैवाधिपसत्यदो यत् ।
तदेनदेनःप्रसरप्ररोधि मन्ये मुनेर्मानसमापि वृत्तम् ॥ ४९ ॥

द्वितीयाटौ स्वेनः ।

दध्यावजग्धिः सजिताक्षसप्तिः सप्ताहमीशं स च सन्तुतोष ।
विशुद्धभावेषु महाप्रसादे विभौ न शुश्रूषणदैर्घ्यमिष्टम् ॥ ५० ॥

अदो जग्धिर्ल्यप्ति किति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वध्याः सपत्नानमुया कृपाण्येत्युदारपाण्या क्षणमीक्षितोऽभूत् ।
त्र्यक्षस्तटितिपङ्गजटोऽभ्रशुभ्रश्चित्ते विशुद्धे धरणीश्वरेण ॥ ५१ ॥

हनो वध लिङि ।

प्रियातिथिप्राप्त्यनवाप्तत्प्तेरगादगेशोऽप्यचलेशबुद्धेः ।
लेभे च दित्सोरदसीयपुंसो नृपः कृपां मूर्त्तिमतीमिवासिम् ॥ ५२ ॥

इणो गा लुङि । 'लेशचित्तात् । ले' इति च पाठः ।

यदत्र राज्ञाधिजगेऽस्त्रशास्त्रं तदेव तत् सम्भृतजीवमासीत् ।
गाण्डीवमाहिण्ड्य हि गण्यवीर्यः कोदण्डिनां मध्यमपाण्डवोऽभूत् ॥

गाङ् लिटि ।

येनैकवीरो भवितुं प्रवृत्तः खड्गेन वल्गन् सह वल्गुनासौ ।
विदिद्युते तेन तु विद्युतेव मही मुदा किं सहसा सहासा ॥ ५४ ॥

अस्तेर्भूः ।

विचित्रवादित्रपवित्रनादैस्तमाव्रजन्तं विदिशो दिशश्च ।
इतः परं भो भवदाश्रिताः स्म इत्यूचुरुच्चैः प्रतिनादलक्षात् ॥ ५५ ॥

ब्रुवो वचिः ।

सैन्यानि विख्यापितपौरुषाणि रिपून्मुखान्यन्वगमन् नृमुख्यम् ।
यथा निवृत्तप्रलयस्य चित्तमक्षाणि दक्षाणि धृतेन्द्रियार्थम् ॥ ५६ ॥

चक्षिङः ख्याञ् ।

कायङ्कुलयुद्धवर्णनम्—

प्रत्यर्थिदावाग्निरसावथैच्छत् काशाकुलक्ष्माधिपतिं विजेतुम् ।
यं द्वेष्टि दिष्टं निजकर्मकृष्टं शिष्टस्य च स्यात् स पुमाननिष्टः ॥ ५७ ॥

अदिप्रभृतिभ्यः शपः ।

प्रत्यग्रहीद् वश्चिमहीशसैन्यं दुर्हृदनीध्वंसमरिः ससैन्यः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समुच्चलत्तुङ्गतरङ्गमालः शोणो यथा गाङ्गमभङ्गमोघम् ॥ ५८ ॥

यङोऽचि च ।

सञ्जाहयीति स्म हयैः सहायैस्तत्सैन्यमन्योन्यमुपात्तमन्यु ।
जन्यं ततोऽभूद् विविधप्रहारमुच्चैः समुच्चारितनाथनाम ॥ ५९ ॥

पूर्वसूत्रस्योदाहरणान्तरम् ।

हया हयानभ्यभवन् गजांश्च गजाः समानायुधनेतृनीताः ।
योधानधर्मं युधि तद्विसृष्टा विश्रान्तिमप्याजहतास्तसंज्ञाः ॥ ६० ॥

जुहोत्यादिभ्यः श्लुः ।

जयैषिणस्तत्र भटा जयं वा पराजयं वानियतं किलागुः ।
विरुद्धसम्पातिमरुत्प्रणुन्ना भङ्गा यथा वारिधरोपरोधे ॥ ६१ ॥

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ।

वज्रोज्ज्वलत्खण्डितगात्रतारा क्षरद्गजाभ्रा क्षतजद्युगङ्गा ।
राजेन्दुरालक्ष्यत युद्धभूमिस्तद्धूलिभिर्द्यौरपि भूरिवास्थात् ॥ ६२ ॥

पूर्वसूत्रस्योदाहरणान्तरम् । 'भूमिस्ततिपिञ्जलैर्द्यौ' इति च पाठः ।

भटा यदाभ्याक्रमत स्वनेतुरधासिषुश्चाट्टसुधां प्रमत्ताः ।
वञ्चीश्वरस्येक्षुवनीमिवेभा विपक्षसेनां क्षपयाम्बभूवुः ॥ ६३ ॥

विभाषा घ्राधेट्शाच्छासः ।

काशाकुलेशे त्वथ कान्दिशीके यानक्षिणोत्तस्य भटेष्वभूवन् ।
दिवि स्त्रियां कण्टकिताङ्गवल्लीनिलीनगात्राः खलु तेवनेन्ये ॥ ६४ ॥

तनादिकृञ्भ्य उः ।

अम्पलप्पुलयुद्धवर्णनम्—

ततो निवृत्याथ वरूथिनीं स्वां मार्त्ताण्डदेवोऽम्बरधुन्यधीशम् ।
ईहाम्बभूव क्षितिपं विजेतुं शल्यप्रधानायुधयोधवीरम् ॥ ६५ ॥

आमः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पश्चात् समुद्रः किमिहातिवृत्त इत्यात्तशङ्कैरुपसिन्धुतीरम् ।
तत्रत्ययोधैरपि सन्निरुद्धा वञ्चीशसेना युधि तान् बबाधे ॥ ६६ ॥

नाव्ययीभावादतोऽम् त्वपञ्चम्याः ।

सुरत्वमेवाम्बरनद्युपास्तौ युक्तं भवेदस्य न भूपरत्वम् ।
इतीव नीतोऽधिरणं स्वरार्त्तो भुवो वियोज्याशु स वञ्चिपेन ॥ ६७ ॥

पूर्वसूत्रस्योदाहरणान्तरम् ।

तेक्कुङ्कूर्-वटक्कङ्कूर्राज्ययोर्लभकथनम्—

पदान्निरस्तावपि दक्षिणेशः स्वादुत्तरेशोऽनुधन नृपालौ ।
वञ्चीशितुर्दक्षिणमप्यथान्यत् पदं स्वमूर्ध्ना द्रुतमक्रमेताम् ॥ ६८ ॥

पूर्ववत् ।

गोश्रीराजेन सह सन्धिपरिपणनम्—

बन्धोः स सेनामुपसिन्धुनेतां माटेश्वरात् सन्धिपरां न्यषेधीत् ।
क्रुद्धापि बुद्धिर्निजबन्धुसङ्गात् भवेत् प्रसन्ना कतकैर्यथापः ॥ ६९ ॥

तृतीयासप्तम्योर्बहुलम् । 'र्यथाम्भः' इति च पाठः ।

अन्येऽपि भीता रिपुधूमकेतोरसेर्निलिल्यू रिपवोऽध्यरण्ये ।
तार्क्ष्यं निरीक्ष्येव समीरभक्षा रराज्यते स्माथ नृपः स्वराज्ये ॥ ७० ॥

पूर्वसूत्रोदाहरणान्तरम् ।

श्रीपद्मनाभाय राज्यार्पणम्—

अस्मिन् स्थिरेयं लसितेति मत्वा श्रीपद्मनाभे सुखमार्पयत् सः ।
लक्ष्मीं सुपूर्णां क्षमया च सख्या प्रचेतसोऽस्यैतदतीव युक्तम् ॥ ७१ ॥

लुटः प्रथमस्य डारौरसः ।

भद्रदीपप्रतिष्ठादिकथनम्—

विशालमस्यालयमातनोत्तं श्रीभद्रदीपं च दृढं समृध्यै ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वञ्चीश्वरो दायधियेव शौरिः सुरक्षितास्मानिति भक्तिशाली ॥ ७२ ॥

पूर्वसूत्रोदाहरणान्तरम् ।

वीरमार्ताण्डनृपतिचरितश्रवणसन्तुष्टस्य विशाखभूपस्य राजानं द्रष्टुं सौधप्रवेशकथनम्—

इति नृपवरगाथाप्राभृतप्रार्पकाणां विकचवदनलक्ष्म्या वन्दिनां द्वापरं सः ।
गिर इह भवितारः सूनृता वेति भिन्दन् हरिरिव गिरिशृङ्गं मञ्चमभ्यारुरोह॥

पूर्ववत् ।

आश्लेषिकाभविहितावतरस्य मान्यश्रीवञ्चिभूमितिलकस्य महामहिम्नः ।
श्रीरामवर्मवसुधाधिपतेश्चरित्रे सर्गोऽगमत् सहजकीर्त्युदयो द्वितीयः ॥७४॥

इति श्रीरामवर्ममहाराजचरित्रे

द्वितीयः सर्गः.

अथ तृतीयः सर्गः.

ज्येष्ठदर्शनसमये सूर्योदयवर्णनम् —

विहितानतिनानुजन्मना स परः प्रत्ययभूर्युवा नृपः ।
शुशुभेऽथ सतां स्वसौधगो मिहिरश्चादिगिरौ ससारथिः ॥ १ ॥

प्रत्ययः । परश्च । 'थ च तां स्व' इति च पाठः ।

ककुभः सुचिकित्सयेव तास्तुतुषुर्नष्टतमोरुजस्तदा ।
अनयोरिनयोः सुतेजसोः क्षणसाम्यस्थितिवीक्षणादिव ॥ २ ॥

गुप्तिज्किद्भ्यः सन् ।

करटाः कुरटन्मुखास्तदा दिशि विभ्रान्तदृशो विबभ्रमुः ।
तिमिराणि हतानि हेतिभिः प्रजिघांसोरिव तीक्ष्णदीधितेः ॥ ३ ॥

धातोः कर्मणः समानकर्त्तृकादिच्छायां वा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नलिनान्यधिगत्य निर्भरा व्यलसन्मित्रकरार्पिताः श्रियः ।
अविसृज्य धनानि सादरं हृदयीयत्सु सुहृत्सु कः कृती ॥ ४ ॥

सुप आत्मनः क्यच् ।

धवलाप्यरुणायमानया वलिता सूर्यरुचा तदा पुनः ।
स्वपुरी प्रविविक्षुणा स्मितैः सुसिताकारि युवावनीभृता ॥ ५ ॥

कर्तुः क्यङ् सलोपश्च ।

कुशलप्रश्नाद्यनन्तरं भरणकार्यप्रसङ्गात् नीतितात्पर्यादिवर्णनम् —

श्रवणे कुशलोदितच्छलात् समसेसिच्यत सोऽनुजन्मनः ।
नयसारसुधारसैस्तदा न महत्सङ्गतिरल्पसौख्यदा ॥ ६ ॥

धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ।

सविधे प्रविधीयतां पदं परिगोपायतु वः सदा हरिः ।
इति सूनृतपूर्विका गिरः स यवीयोभिमुखीः समाददे ॥ ७ ॥

गुपूधूपविच्छिपणिपनिभ्य आयः ।

जनमात्रसुखं सहस्थितिः सहजातैर्हि सुधीस्तु तत्पुनः ।
अभिकामयते हितोन्मुखैर्द्विगुणीकर्त्तुमुदारभाषितैः ॥ ८ ॥

कमेर्णिङ् ।

विधिनैव विदाञ्चकार यः श्रुतजातं श्रुतकालवेद्यपि ।
बहुलीकुरुते तदादरादनुलापैः स यथैधसानलम् ॥ ९ ॥

उषविदजागृभ्योऽन्यतरस्याम् ।

विभजन् वदनादिजन्मतो नृषु भेदांश्चतुरः स्ववृत्तिभिः ।
अशिषच्चतुरान् जनावने चतुरास्यो नयचक्षुषो हि नः ॥ १० ॥

सर्तिशास्त्यर्तिभ्यश्च ।

किमिहास्त्यपनीतिभिर्नृपैः सुविनीतैरपि शास्त्रकोटिभिः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न सुवर्णलताशताञ्चितो हतधारोऽसिरतीव मद्यते ॥ ११ ॥

सार्वधातुके यक् ।

नयरूपजलाशयो जनैः कृततीर्थः प्रविगाह्यते सुखम् ।
सुगभीरतया निजे हिते न पुनर्भ्राम्यति यः स शस्यते ॥ १२ ॥

वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः ।

घृणुते नयपादपस्त्रिपात् फलिनः स्कन्धचतुष्कशोभितः ।
धृतपञ्चसुमः सदोहदो गुणषट्केन च सप्तशाखकः ॥ १३ ॥

तनादिकृञ्भ्य उः ।

प्रभुशक्तिरनारतं जनैरवितव्या व्यवसायरूपया ।
सफलीकुरुतो हि ते जवादषडक्षीणतयैधितेतरा ॥ १४ ॥

तव्यत्तव्यानीयरः । 'रतं नृपैरवि' इति च पाठः ।

नृषु सामप्रुखा यथायथं विनियोज्याः परिपुष्टये श्रियः ।
उचितादनमण्डनाप्लवाभ्युपमर्दा विहिता हि वर्ष्मणः ॥ १५ ॥

ऋहलोर्ण्यत् ।

पुरुषद्रविणे विभागितां विनिपातापहतिं विनौजसा ।
अवशाम्बु मृदा यथा घटी न हि साध्या फलसिद्धिरुद्यता ॥ १६ ॥

उदाहरणम् ।

इह सामयिकेन साधुना गुणषट्केन चिराय सञ्चितम् ।
रिपुकीर्त्तिपिबं महो महत् प्रतिपद्यावनिपो न चाल्यते ॥ १७ ॥

पाघ्राध्माधेट्दृशः शः ।

इनपूर्वकसप्तकोर्जितं भुवि राज्यं जनशर्मधारयम् ।
विकलय्य विलुप्तसज्वरस्तपसे तिष्ठति तोयजन्मभूः ॥ १८ ॥

अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च ।

विविधप्रतिपत्तिरूपिणा तमसापावृतकृत्यवर्त्मनाम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वहितेतरवस्तुबोधको ज्वलदीपः श्रुतमेव कथ्यते ॥ १९ ॥

ज्वलिति कसन्तेभ्यो णः।

विधुरस्य जनस्य पार्थिवः कृतधीराशिषि चाभिनन्दकः।
इति धातुरभीप्सितं जहन् न मुदे सोऽपि पराक्रमाश्रयः ॥ २० ॥

आशिषि च।

विनयप्रणयि श्रुतं शुभं विनयोऽनुज्झितविक्रमो भवेत्।
स च विष्टपपालने पटुस्तदपि स्याद् विविधेन्दिराहरम् ॥ २१ ॥

हरतेरनुद्यमनेऽच् ।

प्रचकास्ति नरे नरेन्द्रता हतकर्णेजपदुर्विलेशये।
गतधीसचिवो विचारदृङ् न पतेत् किन्न्वपथाश्रयोऽन्यथा ॥ २२ ॥

स्तम्भकर्णयो रमिजपोः ।

कुमतेरसमृद्धिलक्षणं स्फुटमात्मम्भरितास्थितैर्धनैः ।
विजयी सचिवादिषूत्सृजन् सुखमाकर्षति तान्यरिश्रियः ॥ २३ ॥

फलेग्रहिरात्मम्भरिश्च।

अविचार्य न किञ्चिदाचरेद् विपदां जन्मभुवो हि साहसम् ।
न जहाति रमा हरिं यथा सुविमर्शं गुणिनां वशंवदा ॥ २४ ॥

प्रियवशे वदः खच् ।

विजिगीषुरपि द्विषन्तपः प्रबलं नाभिभवेद् द्विषं रुषा ।
भुजगाः पवनान् प्रभुञ्जते न गरुत्मन्मुखमार्गनिर्गतान् ॥ २५ ॥

द्विषत्परयोस्तापेः।

यदपायविरोधिनः प्रभोः समुपायप्रसरोऽस्तु मन्थरः
अनिहत्य स नो निवर्त्तते रिपुकूलङ्कषविभ्रमः परान् ॥ २६ ॥

सर्वकूलाभ्रकरीषेषु कषः।

क्षिणुयाद्विषणेपुणा पुरो निपुणोऽन्धङ्करणीं क्रुधं क्षणात् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनिरस्य तमोऽरुणांशुभिस्तरणिर्नाभ्युदयाय कल्पते ॥ २७ ॥

आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् ।

क्रमवृद्धियुजं समृद्धये सुकृशं चापि सुमङ्गलायतिम् ।
प्रणमन्ति नरा नरेश्वरं शशिनं वीक्ष्य यथादिपक्षतौ ॥ २८ ॥

सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप् ।

उपधि प्रकृतानुपाधिभिर्विहितैर्नार्जवमार्जयेद् रिपौ ।
मृदुगीतविभाङ् मृगीगणं मृगयुर्गूढवपुर्जिघांसति ॥ २९ ॥

भजो ण्विः ।

अपि कामदुघां नयागमात् कुधियः कैतवमेव गृह्णते ।
सुरभेः सुखमूधसि स्थितो मशकोऽश्नाति तदीयशोणितम् ॥ ३० ॥

दुहः कब्घश्च ।

अयि संस्मरसि प्रवक्ष्यति प्रपठन्तावपि नौ स देशिकः ।
कुटिलां न भजेत् स्मृतिं पुमानवगच्छेदिति वैरिशङ्कया ॥ ३१ ॥

अभिज्ञावचने लृट् ।

अपनीतिभिरुन्मदिष्णवः समुपेक्ष्या रिपवः सहिष्णुना ।
जनयन्त्यचिरात् प्रमादिनां विपदं सम्पद एव यत्कृताः ॥ ३२ ॥

अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच् । शमित्यष्टाभ्यो घिनुण् ।

पतयालु कलेवरं बुधाश्चपलादीधितिचञ्चलाः श्रियः ।
अनिरीक्ष्य कवीन्द्रजीवनं सह मानेन यशो वितन्वते ॥ ३३ ॥

स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् ।

मृदुतां शिततां वहेत्प्रभुर्नृषु वन्दारुषु निन्दितेषु च ।
हरिनाम यथा सतां सुखं भयमापादयते च रक्षसाम् ॥ ३४ ॥

शृवन्द्योरारुः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विमतश्रियमात्मसात्कृतामनुभुङ्क्ते निजविक्रमेण यः ।
स सतो महतां नृकुञ्जरो नधनाः पूर्वधनैर्हि मानिनः ॥ ३५ ॥

मतिबुद्धिपूजार्थेभ्यश्च ।

परिहीणबलोत्करे रिपावभियायी खलु शूरगर्हितः ।
विकलं विधुमप्यरुन्तुदो न विगृण्हाति विधुन्तुदः क्वचित् ॥ ३६ ॥

विष्यति गम्यादयः ।

समरज्वलने रिपून् क्षिपन् समिधस्तैः सह मोदते पुरा ।
दिवि पूर्वगतैरधीश्वरो ननु यज्वा स्वयमेव भूसुरः ॥ ३७ ॥

यावत्पुरानिपातयोर्लट् ।

प्रतिघाज्वलनं प्रतापिनो यतवान् यस्त्वविचिन्त्य पोषकः ।
शमयेत् स परं वपुर्व्रजन्नबलानां प्रबलाश्रुधारया ॥ ३८ ॥

तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ।

विनिपातशतं विनिर्हरन् प्रभविष्यन् निजलक्ष्यमृच्छति ।
बहुविघ्नहतोऽपि देवराट् न किलाप्राप्य सुधां न्यवर्त्तत ॥ ३९ ॥

लृटः सद्वा ।

भूपाभिमाने राज्ञो विरक्तताप्रदर्शनम्—

इति नीतिविदां परं मतं रजसापावृतचक्षुषां हितम् ।
उररीकुरुते न सत्तमो बहु निर्लाभभयेन निस्तमाः ॥ ४० ॥

निरभ्योः पूल्वोः ।

सुकृतात् सुरनिम्नगाप्लवात् किमु कः शादविनुत्तिमीहते ।
प्रथनार्जितपापमार्जने सुकृतं चेद् द्वितयं वृथा श्रमः ॥ ४१ ॥

विभाषाऽऽङि रुप्लुवोः ।

विजये पुरुषार्थताभ्रमस्त्वभिमानप्रभवः स मौढ्यजः ।
यदि तत्र सतां विहेयता ननु तज्जेषु च सैव विस्फुटा ॥ ४२ ॥

एरच् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निजकर्मभिदातिदन्तुरं विपुलं संसृतिवर्त्म गच्छताम् ।
क्वचिदुच्चगतिर्विपर्ययः क्वचन स्यात् प्रमदेतरौ वृथा ॥ ४३ ॥

प्रमदसम्मदौ हर्षे ।

प्रविकृष्टसपक्तिमैर्मनोरथमारुह्य खलाक्षवाजिभिः ।
विषमे विषये विषीदतां मतिसूतेन पथीष्यते गतिः ॥ ४४ ॥

ड्वितः क्त्रिः । 'कृष्यमप' इति च पाठः ।

प्रचलाचलचक्रवर्तितामधृतिः प्राप्य सुसभ्रमङ्करीम् ।
स्वदिगादिविभागमूढधीः पतति द्रोर्हिमशीकरो यथा ॥ ४५ ॥

कर्तृकर्मणोश्च भूकृञोः ।

भुवनेऽन्यदहन्तया समं न विजाने दृढमान्ध्यकारणम् ।
अतनिष्यदजो न चेदिमामपतिष्यन्न जनाश्च संसृतौ ॥ ४६ ॥

लिङ्निमित्ते लृङ् क्रियातिपत्तौ ।

उदिता द्विनवप्रकारतः खलु विद्या इह कात्र दुर्भगा ।
अपि चाधिकृतेर्वशेन ताः प्रतिदातुं प्रभवन्ति सेविताः ॥ ४७ ॥

समानकर्तृकेषु तुमुन् ।

महतामपि पुष्पितं वचः क्वचिदस्त्वत्र तु मा स्म भूद्भ्रमः ।
अगदं पिबते सितां दिशेच्छिशवे तस्य हि कल्यता फलम् ॥ ४८ ॥

स्मोत्तरे लङ् च ।

जहि वैरिणमाहर श्रियं तनु कीर्तिं विषयान् प्रभुङ्क्ष्व च ।
नृपतिः शुभमित्थमाचरेदिति वाक्संसृतिवार्धिचन्द्रमाः ॥ ४९ ॥

समुच्चयेऽन्यतरस्याम् ।

चलतां नयनौकया रसात् स्वहिते मूढधियां रसाभृताम् ।
विषयोर्मिषु राज्यसागरे सुबहूक्त्वा खलु खेलनश्रमम् ॥ ५० ॥

अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुमतिः श्रुतदर्शमुल्लिखन् श्रुतिमूर्धागम एव सज्जति ।
हतषड्रिपुके सदा सुखे तदविद्वांस्तु परत्र खिद्यते ॥ ५१ ॥

कर्मणि दृशिविदोः साकल्ये ।

राजनीति-वेदान्तयोः परस्परविरोधाद् द्विकमप्यनुष्ठातुं न शक्यत इति विशाखभूपस्यानुयोगः—

इति रागविरागमार्गगां द्विमुखीं वाक्यसुधाधुनीं नृपः ।
श्रवसोदरपूरमापिबन् परितुष्यैवमभाषतानुजः ॥ ५२ ॥

चर्मोदरयोः पूरेः ।

भवताग्रज साधु यत्प्रजाधनपोषं परिपुष्णताऽर्ज्यते ।
सुकृतं तदवत्विमं जनं कृतिनां कर्म हि सर्वशर्मणे ॥ ५३ ॥

स्वे पुषः ।

यदुदाहृतमत्र धीमता मुखतःकारमिदं वचः शुभम् ।
तदुदाहरणात् परिष्कृतं भवतः श्रोतुमिहास्मि कामये ॥ ५४ ॥

स्वाङ्गे तस्प्रत्यये कृभ्वोः ।

अविभाव्य दुरूहलक्षणं न हि लक्ष्यं कृतकृत्यतामियात् ।
ज्वलनस्य जलैरवाध्यता न विबोद्धुं घटतेऽशनिं विना ॥ ५५ ॥

शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् ।

अमृतादुदराशयातिगाद् भृशलोलोऽपि विरज्यते द्रुतम् ।
अभियुक्तवचः पिबन्मनो विकसत्पातुमलं यथोदयम् ॥ ५६ ॥

पर्याप्तिवचनेष्वलमर्थेषु । 'यथोत्तरम्' इति च पाठः ।

अवितृप्ततया त्वदीरितेष्विति वाचालतयाहमावृतः ।
अपि धीरतमं बलाद् गुणा वशयन्त्येव हि भव्यवस्तुनः ॥ ५७ ॥

भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रसङ्गात् स्वातिमहाराजस्यापदानवर्णनम्—

इति तच्छुभतर्षहर्षुलो युवराजो निजपूर्वमातुलम् ।
सुचिरस्क्तया स्थितं हरावपि सम्राजमथाभ्युदाहरत् ॥ ५८ ॥

लः कर्मणि च भावे चाकर्मकेभ्यः ।

अपि दृष्टचरस्त्वया न किं शिशुना स्वातिभवः स मातुलः ।
अवसन् खलु यत्र ते गुणा जितभीष्मे शमनीतिपौरुषैः ॥ ५९ ॥

भीमादयोऽपादाने ।

महदाचरणाध्वविस्तरो वरसामुद्रिकलक्षणद्र्धियः ।
तदुदाहरणास्तदाभवन् वसुधाभृन्नररत्नसुश्रियम् ॥ ६० ॥

तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् ।

ककुभामपि देवताः स्वयं व्यतरन् स्वैः पुरुषै रथादिकम् ।
विभवं प्रभवेऽन्यदुर्लभं क न भुङ्क्ते सुकृताश्रयः सुखम् ॥ ६१ ॥

टित आत्मनेपदानां टेरे ।

अतिमर्त्यसमृद्धिभावितः किमु भेजेऽतिभरात् स नम्रताम् ।
विनयप्रणयः श्रियां प्रियः कुरुते नात्मनि कस्य काम्यताम् ॥६२॥

लिटस्तझयोरेशिरेच् ।

निखिलं समयागतं धनं विधिना सज्जनसाच्चकार सः ।
जनतापजिहीर्षया घनाः सकृपा वारि वहन्ति नात्मने ॥ ६३ ॥

परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ।

कवयोऽस्य महीमरुत्वतः परमाहुः कवनं निधिं निजम् ।
उपयन्ति ततोऽर्थसञ्चयं विनियोगार्हममी सुखं यतः ॥ ६४ ॥

ब्रुवः पञ्चानामादित आहो ब्रुवः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदुपक्रमगीतचातुरीपथपान्था भुवि सन्तु तद्विदः ।
इदमद्भुतमत्र मेनिरे यदमुं ख्यातिभुवं ह्युगायकाः ॥ ६५ ॥

एरुः ।

सुकृतालयमावसान्यमुं किमिति क्षात्रगुणस्तदाखिलः ।
तमसेवत सम्मदात् स्वयं महितं स्थानमवेक्ष्य कस्त्यजेत् ॥ ६६ ॥

मेर्निः ।

जनितः प्रभृतीशितुर्भुवो दिगधीशाहृतदिव्यसम्पदः ।
अपृथुं तनवै कथं नृपं सदृशं कामदुघा हि यस्य भूः ॥ ६७ ॥

एत ऐ ।

इति सर्वगुणोत्तरोऽप्यसौ स्वपनानन्दथुमैक्षतैहिकम् ।
अधनस्य विरक्तिरुद्भवेत् सुसमृद्धस्य किमद्भुतं न सा ॥ ६८ ॥

इतश्च लोपः परस्मैपदेषु ।

मयि मङ्क्षु मुमुक्षुसम्पदः समियुस्त्वत्कृपयेत्यजं भजन् ।
मनसा तृणवद् भुवं त्यजन्नपि मेने स जनैः स्वशासिता ॥ ६९ ॥

झेर्जुस् ।

इति तावदजागरुर्गुणा रसनाग्रेऽनुजतोषपोषकाः ।
युववञ्चिपतेः स्वमातुले प्रथिताः प्रस्तुतसूक्तिकौतुके ॥ ७० ॥

सिजभ्यस्तविदिभ्यश्च ।

एवंविधे लीलासंल्लापसमये मातुलस्य महाराजस्याज्ञानुसारं तं द्रष्टुं द्वयोरपि प्रस्थान-वर्णनम्—

इत्थं मनाक् तदुदितभारतीझरीवेगा व्यधुस्तदनु यदात्र विश्रमम् ।
प्रागात्तदा गुरुनृपसन्निधेर्नरो मूर्तो मुदा प्रकृतनयागमः किमु ॥

आतः ।

क्षितिपसविधं प्रीत्या नाथावलङ्कुरुतं युवा-
मिति गदितसन्देशे तस्मिन् प्रणामपुरस्सरम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्रुतमभवतां पादासेवाकृतादरणौ प्रभो-
गुरुहितविधेर्न प्राक्कृत्यं विना प्रगतिं सताम् ॥ ७२ ॥

तिङ्शित् सार्वधातुकम् ।

आश्लेषिकाभविहितावतरस्य मान्य-
श्रीवञ्चिभूमितिलकस्य महामहिम्नः ।
श्रीरामवर्मवसुधाधिपतेश्चरित्रे
सर्गोऽगमत् सुखविविक्तनयस्तृतीयः ॥ ७३ ॥

'मत् सहजकीर्त्युदयस्तृ' इति च पाठः ।

इति रामवर्ममहाराजचरित्रे तृतीयः सर्गः.

—:*:—

अथ चतुर्थः सर्गः.

प्रस्थानप्रकारवर्णनम्—

भूपतिस्त्वथ चिकीर्षितेऽर्चने प्रेरणान्निजगुरोरमोदत ।
चित्तशुद्धिमुदितः सतां विधिर्वाञ्छिते हि कुरुते सहायिताम् ॥ १ ॥

ङ्याप्प्रातिपदिकात् ।

सानुजः सपरिमेयचेटको मातुलोदवसितं प्रतस्थिवान् ।
प्रह्वता खलु महत्सु मह्यते न स्वपूरुषगणो न भूषणम् ॥ २ ॥

स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् । 'णो नु भू' इति च पाठः ।

सर्वलोकमहनीयतेजसां भृत्यवर्गगणना निरर्थका ।
सञ्चरन्ति निजवृत्तये ग्रहाः सूर्यमिन्दुमनु नैतयोः श्रिये ॥ ३ ॥

अजाद्यतष्टाप् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh
BVBSSMV

प्रेक्षणे कुतुकिनीः पथि प्रजाः प्रस्थितौ मृदु विवृत्तलोचनम् ।
प्रेमनिर्भरमुभावपश्यतां लोकतोषकरणैकसस्पृहौ ॥ ४ ॥

ऋन्नेभ्यो ङीप् ।

नेत्रयोः सुमहती फलागतिर्भूभृतोश्चिरमभङ्गवीक्षणात् ।
ताः शशंसुरिति वेधसं हृदा तुल्यकर्मनयनद्वयीकृतम् ॥ ५ ॥

उगितश्च ।

उन्मिषन्मुखसरोरुहा चक्षुः सङ्कुचत्करकुशेशया जनाः ।
एतयोर्निखिललोकमित्रतां शर्वरीश्वररुचिं च वीक्ष्य किम् ॥ ६ ॥

वनो र च ।

रङ्गविलासाख्यराजगृहवर्णनम्—

तत्क्षणादथ नृपाववपश्यतां मण्डनं धरणिमण्डलान्तरे ।
मातुलस्य नगरीं सुमोहनीमादरेण किमु किञ्चिदागताम् ॥ ७ ॥

टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ।

भाग्यजातकुलशेखराभिधो यादृशीं श्रियमपोषयन्नृपः ।
यत्र देवसदनेऽपि दुर्लभा तादृशीत्यनुमिनोति मे मनः ॥ ८ ॥

पूर्वस्योदाहरणान्तरम् ।

निर्मलाभिनवदानवारिभिः पावनी बहुसुधा गृहाञ्चिता ।
भूरिधाम्न्यतुलरत्नजालकैः सातिगच्छति सुरालयं न किम् ॥ ९ ॥

अन उपधालोपिनोऽन्यतरस्याम् ।

एकतः स्फुटमनन्तवाहिनीं बिभ्रतीं सुकृतपद्धतीसुगाम् ।
भूभृदीश्वरनिवासभासितां तां पुरीमनु हि वज्रिणः पुरी ॥ १० ॥

वह्वादिभ्यश्च ।

विस्मयो दिवि किमेकरम्भया यत्र पत्रततकुड्मलस्तनीः ।

BVBSSMV

720

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कामचञ्चलमरुत्प्रणर्तिता वीक्ष्य सोमुदति ताः सहस्रशः ॥ ११ ॥

स्वाङ्गचोपसर्जनादसंयोगोपधात् ।

भूरिधीरसदपारिजातताचारुनन्दनवनातिमञ्जुलम् ।
वञ्चिभूमिपतिपत्तनं कथं सञ्जिगीषति न काश्यपेः पुरम् ॥ १२ ॥

अत इञ् ।

चित्रपत्रसुमनःपवित्रिता विस्तृतात्र परिखा परिष्कृता ।
मानुषाधिपतिमानसश्रियां यां प्रसाधयति चित्रवस्त्रवत् ॥ १३ ॥

मनोर्जातावञ्यतौ षुक् च । 'चित्रपत्रिगणसूनचित्रता विस्तृ' इति च पाठः ।

तज्ञकोकनदकानुबिम्बवत् स्वच्छरौचनिकवप्र भूषिता ।
पद्मरागरशना धरेव या राजकस्य सुखदापि दुर्गमा ॥ १४ ॥

लाक्षारोचनाट्ठक् । गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद् वुञ् ।

वर्णमार्दवविशेषकोमला यत्र नर्मवनगुल्मवीरुधः ।
यौवताञ्जनलग्नकुङ्कुमा रक्तपल्वलजलोक्षणात् किमु ॥ १५ ॥

भिक्षादिभ्योऽण् ।

व्योमयानसमसौधसंश्रिता यत्र शश्वदवरोधयोषितः ।
दिव्यरूपविजिताप्सरोगणा भूपगेहमभितश्चकासति ॥ १६ ॥

द्युप्रागपागुदक्प्रतीचो यत् ।

द्रष्टृलोकनिकरैरिति स्तुते पत्तनेऽथ च ततस्त्यमीशितुः ।
मन्दिरं विविधसौविदावृतं चक्षुषोरजनि गोचरं तयोः ॥ १७ ॥

अव्ययात्त्यप् । 'निवहैरिति' इति च पाठः ।

ह्यस्तनं किमिति नूत्नरोचिषा प्रोह्यमानमनुवासरं जनैः ।
नव्यतामतिरनुक्षणं च यद् भव्यलक्षणमिदं हि वस्तुनः ॥ १८ ॥

ऐषमोह्यःश्वसोऽन्यतरस्याम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यत्र नागरकशिल्पिकल्पिता मानवप्रतिकृतीरितस्ततः ।
जानते स्म कृतभाषणाः पुनर्व्रीलयानधिगतोत्तरा नराः ॥ १९ ॥

नगरात् कुत्सनप्रावीण्ययोः ।

शङ्करत्वमनवगम्य तस्य किं राजताद्रिरुपयातवानिह ।
शङ्क्यमानमिति सर्वतश्चितं राजकीयविभवैर्विभासितैः ॥ २० ॥

राज्ञः क च । 'विभासि' इति च पाठः ।

पर्वतीयमृगपक्षिभिर्वृतं यन्त्रयन्त्रणवशेन गन्तृभिः ।
कृत्रिमैर्नृपमुदे विलोककैर्न व्यधारि यदतत्त्वसत्त्वता ॥ २१ ॥

विभाषाऽमनुष्ये ।

मामकीनमिह शिल्पमुत्पतेदद्भुताय जगतीपतेर्मुहुः ।
इत्थमुत्तरलकौतुकैः कृते शिल्पिभिर्नृपगृहे क्व वाल्पता ॥ २२ ॥

तवकममकावेकवचने ।

वीरवैश्रवण चारु भावते यत्र सभ्यपतितः परैधितः ।
सुप्रियालकमिदं तदादृतं किन्नरैर्नमनसादरोत्सुकैः ॥ २३ ॥

अ साम्प्रतिके ।

ऋद्धपुण्यजनवर्यसञ्चयैर्दीप्यमानकमनीयविग्रहैः ।
गम्यमानमनिशं निषेवितुं स्वामिनं धनदमीशसंश्रयम् ॥ २४ ॥

सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् (?)।

नैकवर्णयुतचर्मधारिभिर्बाधकैरपथचारिणः क्षणात् ।
तत्र तत्र च चिरन्तनाश्रयैः खड्गिभिः प्रतिभयेक्षणैः श्रितम् ॥ २५ ॥

सायञ्चिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च । 'रिणां क्षणात्' इति 'क्षणैश्रितम्' इति च पाठः ।

उच्चगैः श्रुतिमनोज्ञभाषणैः शुद्धभावरमणीयकर्मभिः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भौमलोककुतुकप्रदैश्चितं रम्यनीलगलमुख्यकैर्द्विजैः ॥ २६ ॥

तत्र जातः ।

भूमिभृत्पुरुषसिंहहुङ्कृतैः सङ्कुलं क्वचन सर्वभीतिदैः ।
पन्थकैः क्वचिदमात्यचारणैः सन्निरुद्धगतिमप्यकालतः ॥ २७ ॥

पथः पन्थ च ।

यः सिताचलमशिश्रयच्छ्रियै फल्गुनादपि ततः समज्ञया ।
सोऽयमेव बहुमानभाजनं यं स्वयं समभजन्त तच्छ्रियः ॥ २८ ॥

श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् ।

क्रीतलब्धकुशलोप्तदेयकैः प्रत्ययैः क्षितिपतेः कृतैरपि ।
भासितानि च पदानि वस्तुभिस्तद्धितानि न कथं स्युरुत्तरैः ॥ २९ ॥

कृतलब्धक्रीतकुशलाः । क्रीतादिप्रत्ययाः ।

ऐक्षि तत्रभवमैशभूभृतस्तुङ्गशृङ्गमिव देवमार्गगम् ।
मुख्यसौधमथ वञ्चिभूपतेः कीर्तिसञ्चय इव प्रयान् दिवम् ॥ ३० ॥

तत्र भवः । 'प्रयान् दिवः' इति च पाठः ।

पिङ्गलप्तमिव हेमकुम्भकैर्नीलकण्ठमिव लम्बिवारिदैः ।
नीललम्बनपटैः सकृत्तिकं भूतिमुख्यमनुकुर्वदीश्वरम् ॥ ३१ ॥

दिगादिभ्यो यत् ।

गूढभावशुभवर्णशोभितैः सत्पदप्रणयपथ्यवृत्तिभिः ।
मूर्त्तिमद्भिरिव भूपभाषितैर्भूषितं नृपनियोज्यपूरुषैः ॥ ३२ ॥

पूर्वस्योदाहरणान्तरम् ।

आन्तरालयिकवस्तुविस्तरैरास्तृतं विविधरत्नशोभिभिः ।
तत् पुनर्नृपतिरत्नमाददे वर्धयन्ति हि समृद्धयस्तृषम् ॥ ३३ ॥

अन्तःपूर्वपदाट्ठञ् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अङ्गुलीयवलयादिभूषणैर्भूषिताः परिलसत्कलेवराः ।
तन्नरा यदि न भूषिताः कथं प्राप्नुयुर्न दिविषत्वमञ्जसा ॥ ३४ ॥

जिह्वामूलाङ्गुलेः छः ।

चेटकैः क्वचन शौल्कशालिकैस्तद्वदापणिकमानवैरपि ।
प्राभृतार्पणमुहूर्त्तकाङ्क्षिभिः सेव्यमानमजिरान्तरे चिरम् ॥ ३५ ॥

ठगायस्थानेभ्यः । 'जितान्त' इति च पाठः ।

ये च पैतृकमिवानुशासनं मन्वते गुरुतया नृपागतम् ।
तैरुपस्कृतमुपाहृतोपदैः राजकैः क्वचिदवीक्षितान्तरैः ॥ ३६ ॥

ऋतष्ठञ् । 'पस्तृतमुपा' इति च पाठः ।

तस्य हीदमिति भूपतेर्नृपैरर्पितासु गजतासु तन्मदैः ।
प्रस्नुता त्रिगतधूलयो बभुस्तद्गृहाङ्गणभुवः सुभाविताः ॥ ३७ ॥

तस्येदम् । 'पैः प्रार्पि' इति च पाठः ।

यत्र जातुषमृगेन्द्रवीक्षणान्निश्चलाः क्वचन मत्तदन्तिनः ।
यन्तृभिर्गतभयैः प्रभेजिरे नाभिगम्य हि चलन्ति जन्तवः ॥ ३८ ॥

त्रपुजतुनोः षुक् ।

दन्दशूकनिवहेषु चक्षुषा सन्दहत्स्विव च तान्तवान्तरे ।
दान्ततां स्फुटमपागमन् यदा निर्भयाः समभवंस्तदा जनाः ॥ ३९ ॥

ओरञ् ।

राङ्कवास्तरणमध्यवर्त्तनात् स्फाटिकैः प्रसृतकर्बुरप्रभैः ।
स्तम्बकैर्बलविपक्षकार्मुकैर्वित्तवर्षमिव सूचयन् सदा ॥ ४० ॥

पूर्वस्योदाहरणान्तरम् । 'यत्सदा' इति च पाठः ।

गीतपेटकनिवेशितान्तरे यत्र भर्भमयशायिकागृहे ।
भाग्यभूरवनिपालको मुदं प्रापदन्वहममर्त्यगीतिभिः ॥ ४१ ॥

मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्रव्यभेदलसितैस्तदायुधैराचरद्भिरथ माननां भटैः ।
उच्छ्रितैः क्षणरुचिप्रभैः क्षणादुत्थितेव नगरी तदीक्षणात् ॥ ४२ ॥

द्रोश्च ।

परस्परसमागमवर्णनम्—

प्रेमसारमकरन्दपूरितैर्दृष्टिसूनपरिवर्षणैस्तदा ।
तज्जना विदधुरानुकम्पिका वञ्चिभूपतिकुमारसत्कृतिम् ॥ ४३ ॥

तेन दीव्यतिखनतिजयतिजितम् । 'परिवृष्टिभिस्तदा' इति च पाठः ।

नाविकौ व्यसनवारिधौ नृणां स्मेरवक्त्ररुचिभिस्तदर्चनम् ।
तौ प्रगृह्य निजमातुलान्तिकं जग्मतुर्विनयनम्रविग्रहौ ॥ ४४ ॥

नौद्र्व्यचष्ठन् ।

मञ्चमध्यमधितिष्ठति स्थितं पञ्चवक्त्रवरविष्टरेऽञ्चिते ।
पञ्चबाणमिव सञ्चिताकृतिं वञ्चिपं जनपदेषुकैर्चितम् ॥ ४५ ॥

चरति ।

मूर्ध्नि बिभ्रतमकृत्रिमप्रभे शोणपेलवशिरस्त्रभूषणम् ।
पद्मनाभपदपद्मशोणिमा सुस्थिरः किमु चिरस्य मेलनात् ॥ ४६ ॥

वत्रेर्मम् नित्यम् ।

गोऽधिदेशकृतभूतिरेखया रम्यमौजसिकसंस्तुताकृतिम् ।
शर्वरीशशकले यदृच्छया प्राश्रयेव न चिरांशुरेखया ॥ ४७ ॥

ओजस्सहोऽम्भसा वर्तते । 'संस्कृताकृ' इति च पाठः ।

प्रातिलोमिकमपि स्वगोचरं कुर्वता चपलमानुलोमिकम् ।
ईक्षणेन नयनान्तशोभिना सेचयन्तमिव सर्वतः सुधाम् ॥ ४८ ॥

तत्प्रत्यनुपूर्वमीपलोमकूलम् ।

कर्णरत्नयुगलस्य कैतवादेत्य तौ गुरुसुतौ स्वसंशयान् ।
पृच्छतः किमिति संशयास्पदं पूर्णचेतनिकनीतिकौशलम् ॥ ४९ ॥

रक्षति । 'देत्य को गुरुसितौ' इति च पाठः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शाब्दिकश्रुतिविकासकारिणा केकिनादघनमाधुरीभृता ।
भाषितेन निजपादसेवकान् भावयन्तमनुकर्मनिर्वृतान् ॥ ५० ॥

शब्ददर्दुरं करोति ।

नीलमध्यमणिहीरभूषणं हारलम्बि दधतं महोरसा ।
धार्मिके हृदि चिरं धृतं हरिं शेषमण्डलगतं स्फुटं किमु ॥ ५१ ॥

धर्मं चरति । 'हरिः शे' इति च पाठः ।

स्वस्तरुत्वकथनाय हस्तयोर्न्यस्तवान् कटककैतवाद् विधिः ।
आलवालमिति दातृतावशात्तर्क्यमाणमरिसैन्यघातिनम् ॥ ५२ ॥

सेनाया वा ।

तत्र वैजनिकपूरुषैः सुखं वीजितं चलितरत्नकङ्कणैः ।
पार्श्वयोस्तदुदितैर्मरीचिभिः सुष्ठु जातपरिधिं महाप्रभम् ॥ ५३ ॥

तत्र नियुक्तः ।

सर्वलोकनयनोत्सवं भुवो धुर्यमार्यमवनीपती यदा ।
नेत्रयोरकुरुतां प्रणेमतुस्तत्पदाम्बुजयुगे तदा मुदा ॥ ५४ ॥

धुरो यड्ढकौ । 'पतिर्यदा' इति च पाठः ।

रत्नपीठखरतासहे सुखं तिष्ठतां गुरुपदे इहेति किम् ।
मस्तकप्रपतितैः सुमोत्करैरास्तृतं स्थलमतुल्यसौरभैः ॥ ५५ ॥

नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु ।

ज्ञानपादिकमनोज्ञमाचरन् प्रेमभारपुरुवेगविह्वलः ।
आशिषं स पुरुषायुषोन्मुखीं तावुभौ समुदनीनमद् विभुः ॥ ५६ ॥

तत्र साधुः ।

तत्कुमारयुगलं प्रपश्यतः स्वापतेयमिव पुण्यसंहतेः ।
भूपतेर्हृदयमक्षिणी परं मत्सरादिव विकासमव्रजन् ॥ ५७ ॥

पथ्यतिथिवसतिस्वपतेर्ढञ् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ईक्षितैर्विनयगौरवोचितैः प्रेमभारकरुणाप्लुतैरपि ।
मञ्जिमा तदुदितैः परस्परं कोऽपि सभ्यसुखदस्तदाभवत् ॥ ५८ ॥

सभाया यः ।

पादयोः प्रणयिनोः कुमारयोर्निर्भरप्रणयिनी तदीक्षणे ।
ईयतुः क्षणनिमीलनाक्षमे फुल्लपङ्कजसतीर्थ्यतां चिरम् ॥ ५९ ॥

समानतीर्थे वासी ।

रत्नसानुगिरिमूर्धगो रविः पार्श्वभागरचितोशनो बुधः ।
संवृतो यदि सगर्भ्यदैवतैरस्य तस्य तुलना तदा भवेत् ॥ ६० ॥

सगर्भसयूथसनुताद्यन् ।

मातुलस्य वन्दनाय देवकुलिकेनानीतं ९७३ तमे कोलम्बहायने दिवङ्गतस्य राज्ञश्चित्रपटं दृष्ट्वा प्रसङ्गात्तद्गुणादिसूचनम्—

प्रक्रान्तसंल्लपितकौतुकमास्थितस्य भूपाग्रियस्य समयः स समाससाद ।
प्राचीनभूपवरचित्रसमर्चने यः श्रीरामवर्मनृपचित्रमपि प्रणीतम् ॥६१॥

घच्छौ च । 'संलपनकौतु' इति 'भूमिवर' इति च पाठः ।

वहंस्तेजो दिव्यं मुकुरमिषतोयं त्रिदिवतो
ध्रुवं वंश्यान् द्रष्टुं ध्रुवमिव मनुः स्वागमदमून् ।
इति प्रोद्यच्छङ्के जगति कृतकृत्ये च नृपतौ
युवानौ तावास्तां प्रचुरकुतुकौ तस्य चरिते ॥ ६२ ॥

आश्लेषिकाभविहितावतरस्य मान्य-
श्रीवञ्चिभूमितिलकस्य महामहिम्नः ।
श्रीरामवर्मवसुधाधिपतेश्चरित्रे
सर्गोऽगमन्नगरवर्णनवांश्चतुर्थः ॥ ६३ ॥

'आश्लेषतारविहि' इति 'वर्मविपुलाधिप' इति च पाठः ।

इति श्रीरामवर्ममहाराजचरित्रे चतुर्थः सर्गः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ पञ्चमः सर्गः.

चित्रपटगतस्य राज्ञः कथां भागिनेययोः कथयता मातुलमहाराजेन प्रस्तुतं तद्गुणातिशयवर्णनम्—

भूमेर्भर्त्ता सोऽथ मार्त्तण्डनामा पीठे तत्रैवोपविष्टः पिपासुः ।
वत्सीयामित्याबभाषे सतोषं वार्त्तां वार्त्तः पूर्वभूपस्य तस्य ॥ १ ॥

तस्मै हितम् ।

कर्ण्या वर्ण्याकर्ण्यतां तस्य वार्त्ता किञ्चिद् वञ्चिक्षोणिभर्त्तुर्युवाभ्याम् ।
भूस्थैः स्वस्थप्राज्यसौख्यैस्तदानीं स्वर्गो वर्गैर्मानुषाणां न गण्यः ॥ २ ॥

शरीरावयवाद्यत् । 'वर्ण्यौ कर्ण्य' इति पाठः ।

कीर्त्या जैत्र्यां सर्वतो निर्वृतायां भूपस्यास्य प्रास्तवार्त्ते तमिस्रे ।
लोकालोकस्यापरांशोऽपि दिव्यैर्भूयालोकादात्मनीनोऽस्ति सेव्यः ॥ ३ ॥

आत्मन्विश्वजनभोगोत्तरपदात्खः । 'निर्वृताया भूपः' इति च पाठः ।

धर्म्यै रम्यैः कर्मभिः शर्मकृद्भिः शारतुर्लोकान् सार्वभौमस्य तस्य ।
धर्मस्तावन्मत्सरात् क्षीणशर्मा निर्मर्यादं दौर्मनस्यं किलापत् ॥ ४ ॥

सर्वभूमिपृथिवीभ्यामणञौ ।

यक्षाध्यक्षः कृत्तिवस्त्रैकमित्रश्चित्तस्यात्र्येवोत्तराशापरोऽभूत् ।
श्रुत्वा वित्तप्रोन्नतिं पार्थिवस्य स्फारां भर्त्तुः सन्निधिं चापि लक्ष्म्याः ॥५॥

पूर्वस्योदाहरणान्तरम् । 'त्तस्यात्येवोत्तरा' इति 'वस्य पृथ्वीं भर्त्तुः' इति च पाठः ।

औदार्ये तं रन्तिदेवं वदन्ति प्राह्लादिं तं लौकिका विप्रभक्तौ ।
वीक्ष्य क्षान्तिं किं क्षमात्रातिसक्ता वीर्ये सोऽभूदर्जुनद्वन्द्वतुल्यः ॥ ६ ॥

तत्र विदित इति च ।

असूयाविष्टस्य ठीपोर्युद्धायागमनकथनं तन्निमित्तं ब्राह्मणानां व्यलीकवर्णनं यवनानां मद्यपानद्यूतादिवर्णनं च—

आकर्ण्यैवं वर्णसंरक्षणाद्यं राज्ञः पुण्यं सन्ततं दीर्घकर्णः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निष्क्रान्तोऽभूत्तन्मृधोत्कस्तुरुष्कः शीर्षच्छेद्यो लब्धवर्ष्मा किमीर्ष्या ॥७॥

शीर्षच्छेदाद्यच्च ।

युद्धोद्युक्तैर्योधचक्रैस्तदीयैराबद्धा भूर्भूर्यभद्राप्त्युदर्कैः ।
वध्यो बुध्या दुःस्थया बाध्यते यत् सोऽयं लोके शस्यते विध्युपायः ॥

दण्डादिभ्यो यत् । 'भूर्भूर्यदभ्राप्त्यु' इति च पाठः ।

प्लोषं प्लोषं गेहपङ्क्तीर्द्विजानां तोपं तोपं घूतभेदेन दण्ड्याः ।
पायं पायं वारुणीं दारुणास्ते वर्णोत्कृष्टान् प्राहरन् हीनवर्णाः ॥ ९ ॥

पूर्वस्योदाहरणान्तरम् ।

केचिन्नीचा यज्ञियानां निशान्ते शीधुं पातुं प्रारभन्ताप्रशान्ताः ।
होमामत्रं पानपात्रं खलानां शुण्डा चासीद् यज्ञशाला विशाला ॥ १० ॥

यज्ञर्त्विग्भ्यां घखञौ ।

पान्थासेव्या भूसुराढ्या पुरा या जाता साभूद् भूः सुराढ्या तदानीम् ।
विप्रद्रोहाज्जातरोषा किलैषा चित्तभ्रंशात् पातयन्ती किमेतान् ॥ ११ ॥

पन्थो ण नित्यम् ।

पर्यावव्रे वारुणी श्मश्रुलास्यैर्योधैः स्त्रीभिस्तत्र मास्यादिबालैः ।
तत्संक्रान्तैः श्मश्रुभिर्बभ्रुस्ते किञ्चिच्छुच्यां वृश्चिकावेशमस्याम् ॥१२॥

मासाद्वयसि यत्खञौ ।

तेषां पानं नैव याथाकथाचं सम्प्रारब्धं तेमनैः कामनीतैः ।
क्षीणायुष्ट्वात् कृत्स्नमल्पैः क्षणैस्ते भोक्तुं भोज्यं वेधसा चोदिताः किम् ॥

तेन यथाकथाचहस्ताभ्यां णयतौ ।

योग्यैरेभिर्वस्तुभिः प्रस्तुता सा क्षिप्रं चक्रे चक्रमेषां परिस्रुत् ।
गन्धाक्रान्त्या सृक्कसर्पद्रसज्ञा ग्रस्यन्द्यास्यस्थोदकं तद्रसज्ञम् ॥ १४ ॥

योगाद्यच्च । 'योग्यैरेतैर्व' इति 'न्द्यास्यस्योदकं' इति च पाठः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वृद्धैरैकागारिकीं तां प्रसन्नां प्रादुर्मोदात्तत्प्रियाः स्वप्रियेभ्यः ।
कान्तं कार्ये प्रेषयन्ती त्रिवासं कुर्यादन्तःस्थेयमेवं क्रुधा किम् ॥ १५ ॥

ऐकागारिकट् चौरे ।

ताभिर्दत्तां नेत्रनीलोत्पलाढ्यां वक्त्रासङ्गाच्छस्तमाधुर्यगन्धाम् ।
अभ्यस्तत्वात्तां पपुस्तेऽथ योधाः पापात् स्वल्पीभूतमायुः स्वकं किम् ॥

तस्य भावस्त्वतलौ ।

शुभ्रा पीता सा तदैवानुरक्तैर्नीला नारीनेत्रनीलाब्जपातात् ।
मोदं प्रादाद् वर्णसाङ्कर्यवाञ्छा किञ्चापूर्णा तत्र तेषां विशेषात् ॥ १७ ॥

गुणवचनब्राह्मणादिभ्यः कर्मणि च । 'ञ्चाचूर्णा' इति च पाठः ।

लीलालापानाचरन्तः प्रचेलुर्हेलालोलास्तत्र हालाविलासात् ।
लालास्रावैराकुलाः स्थूलकायाः शैली तेषां बाल्यवचास लोला ॥ १८ ॥

पूर्वस्योदाहरणम् । 'लोलास्तेऽत्र' इति च पाठः ।

चित्ते गत्वा तत्स्मृतिस्तेयकारी शीधुर्गर्वं प्रत्यदात्तेष्वखर्वम् ।
मुख्यं सख्यं संविधायामुना ते किं किं मत्ता नाचरन्नस्तशङ्काः ॥ १९ ॥

स्तेनाद्यन्नलोपश्च । सख्युर्यः ।

मैरेयोत्थं प्राप्य कापेयमत्र ज्ञाते यस्य स्वेषु नास्मार्षिपुस्ते ।
सात्म्यात् स्वान्तं नातिमत्तं यदेषां तस्मात् स्वान्तं न व्यधुर्दुर्विधाशाः ॥

कपिज्ञात्योर्ढक् । 'स्वात्म्यात्' इति 'विधीशाः' इति च पाठः ।

सौहित्योत्थे तावदज्ञातपूर्वे गोष्ठीलास्ये सम्प्रवृत्ते तदीये ।
केचित् पेतुः सन्नमन्तः किमस्मिन् पौरोहित्यं प्राप्तवत्यै सुरायै ॥ २१ ॥

पत्यन्तपुरोहितादिभ्यो यक् ।

जातोदन्या यौवनोत्कर्षधन्याश्चान्ये धून्वन्मस्तकाः सन्ननर्त्तुः ।
अभ्यस्यन्तो वन्चिभूपस्य जन्ये कावन्धं किं नर्त्तनं भावि शीघ्रम् ॥२२॥

हायनान्तयुवादिभ्योऽण् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

केचिद् द्यूतायोद्यतास्तेष्वनवद्याः क्षिप्रं क्षीबाश्चिक्षिपुस्तानदक्षान् ।
अद्यश्वीनेऽप्यक्षसाः सांयुगीना जन्ये मन्ये मन्युमेवं विनिन्युः ॥ २३ ॥

अद्यश्वीनाऽवष्टब्धे ।

तत्राविष्टाः स्वेष्टमष्टापदीयान् श्रेष्ठान् शारांश्चकुरष्टापदस्थान् ।
अन्तर्भद्यप्रस्नुवत्केशजाहा व्याचिक्रीडुः सम्प्रविष्टापदस्ते ॥ २४ ॥

तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ ।

बीजाकारैर्वैरभूमीरुहाणामेते लीलाचुञ्चवः शारवारैः ।
वीरालापैरुद्धतोत्साहभाराः सन्दीप्यन्तस्तद्ग्लहानप्युपादुः ॥ २५ ॥

तेन वित्तश्चुञ्चुप्चणपौ । 'न्दीव्यन्त' इति च पाठः ।

शाराः शूरैः प्रेर्यमाणा विरेजुर्नानावर्णास्तत्र नानापदेषु ।
क्वापि श्लिष्टाः केवलाः क्वापि नष्टा नृणां वृत्तिं नूनमत्राचरन्तः ॥ २६ ॥

विनञ्भ्यां नाना ञौ न सह ।

निर्मर्यादैस्तत्र मैरेयवीर्यैर्भूयालापं प्रेर्यमाणा विशालाः ।
मर्यादां तेऽप्यत्यगुर्वा शकौघाः कार्ये नूनं कारणस्था गुणाः स्युः ॥२७॥

वेः शालच्छङ्कटचौ । 'भूयाला' इति च पाठः ।

एवंभूतेष्वत्र कल्लोलिताशा यावज्जाता देवनासेवनेषु ।
भग्नः कश्चिद्भग्नतद्भग्नकाङ्क्षो भावैः क्रूरैर्देवतामासिषेवे ॥ २८ ॥

तदस्य सञ्जातं तारकादिभ्य इतच् ।

कर्त्ता धूर्त्तश्चर्द्धितश्चित्तशुद्धिर्मद्यैर्हृद्यैर्दुर्वचांस्येव मन्त्राः ।
सत्सामग्रीद्यूतकर्मात्र पूजा न प्रत्यक्षः किं कलिर्देवता स्यात् ॥ २९ ॥

पूर्वस्योदाहरणम् । 'मन्त्रः ।' इति च पाठः ।

वार्त्तार्थैषां मास्त्वनभ्याशमित्या तावच्चैतद् वाहिनी वाहिनीशम् ।
पूर्वेषां नो जानुदघ्नं प्रतापः पोत्रीवाद्यो व्याकुलाङ्गं व्यधत्त ॥ ३० ॥

प्रमाणे द्वयसज्दघ्नञ्मात्रचः ।

ठीपुं युद्धे विजित्य कृतस्य ब्राह्मणसंरक्षणस्य वर्णनम्—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कालेयैस्ते यापयन्तो विनोदैः कालं कालाकर्षणाद् दाक्षिणात्याम् ।
आशां यान्तः पौरुषाभ्युच्छ्रिताङ्गान् लक्षीचक्रुः सादिनुन्नांस्तुरङ्गान् ॥

पुरुषहस्तिभ्यामण् च । 'रुषात्युच्छ्रि' इति च पाठः ।

तावद्वेगान् वीक्ष्य रथ्यान् पुरस्तात् पश्चाद् वीरान् वन्दिभूपानुशिष्टान् ।
म्लेच्छाः सद्यः सम्मुमूर्च्छुर्हताङ्गा नागा यद्वत्तार्क्ष्यपक्षोत्थवातैः ॥३२॥

यत्तदेतेभ्यः परिमाणे वतुप् ।

ठीपुर्ज्ञात्वा भूपसैन्येष्वियत्तां नापत् क्लेशं तत्तुरुष्काधिराजः ।
योऽसौ हैमे पद्मनाभस्य केतावर्वारोपं संवितेने प्रतिज्ञाम् ॥ ३३ ॥

इदंकिमोरीश्की । 'वभ्या ? रोपं' इति च पाठः ।

आरादायश्शूलिकेनामुनासौ सेना नुन्ना भूपसेनां रुरोध ।
जन्ये भग्ना दुद्रुवुः सैनिकास्ते भीता भूता विष्णुभक्तादिव द्राक् ॥३४॥

अयश्शूलदण्डाजिनाभ्यां ठक्ठञौ ।

शस्त्रैरासन् क्षत्रियेन्द्रस्य भृत्यैर्भग्नाः सर्वे क्षेत्रियाः शात्रवस्तु ।
पद्मीवासीत् केसरे केसरीन्द्रं शुण्डादण्डेनाक्षिपन् हीपिसार्थी ॥ ३५ ॥

क्षेत्रियच् परक्षेत्रे चिकित्स्यः । 'हीविसा' इति च पाठः ।

मूलावासं नाशयन् कैश्चिदन्यैरासन्नं तं सैन्यमप्यात्मयोधैः ।
भूपो गृध्रं छिन्नपक्षद्वयत्वात् क्षीणं हीणं तुल्यमस्याततान ॥ ३६ ॥

द्वित्रिभ्यां तयस्यायज्वा ।

पादे पादे प्रस्खलन्तं खलं तं ठीपुं पापं प्रापयन् भूपभृत्याः ।
याम्यामाशामाशु तद्भीतिमत्त्वाद्धावन्तं चाप्युत्तराशां दुराशम् ॥ ३७ ॥

तदस्यास्त्यस्मिन्निति मतुप् ।

पारावारे मज्जिता दैत्यभर्त्रा पूर्वं पृथ्वी विन्यधे हन्त नैवम् ।
भूमीदेवानाक्षिपद्भिः स्वभूपा नग्नैः क्रान्ता प्राज्ञसेव्या यथा तैः ॥ ३८ ॥

प्रज्ञाश्रद्धार्चाभ्यो णः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवी तावन्नीरुजा काश्यपी सा साङ्कूरोऽभूद्वेदकल्पद्रुमश्च ।
ब्राह्मं तेजो लब्धसंज्ञं कथञ्चिन्नष्टे म्लेच्छावग्रहे तीक्ष्णदाहे ॥ ३९ ॥

द्युद्रुभ्यां मः । 'द्रुरकल्प' इति च पाठः ।

भीता दूराद् वञ्चिभूपं शुभंयु प्राप्ताः सर्वे भूरितोषं समूषुः ।
क्षत्रः शब्दस्तत्र भूपे धृतार्थो विप्रादीनां तत् क्षतात्त्राणहेतोः ॥ ४० ॥

अहंशुभमोर्युस् ।

आयान्त्वायान्त्वत्र वासं लभन्तां मायां त्वस्य प्रेक्ष्य मा यान्तु भीतिम्
इत्थं लोकान् कत्थमाने वदान्ये भूपे हृष्टा भूर्नु रोमाञ्चिता तैः ॥ ४१ ॥

एतदोऽन् । 'भूर्न रो' इति च पाठः ।

नाह्लादित्वान्न द्विजैराद्दतत्वाद् वृत्तस्थत्वान्नापि नैवोच्चगत्वात् ।
श्रीशांघ्रिस्थत्वाच्च नो नोत्कलत्वाद् विप्रैस्तेने तत्र जैवातृकत्वम् ॥४२॥

सप्तम्यास्त्रल् ।

प्राक्संवर्ते सम्प्रवृत्ते धरित्रीं नावं तन्वन् स्वान् जनानादिमीनः ।
नीत्वेवास्यां भूपवर्यस्तदानीं लोकान् सर्वान् स्वक्षितौ संररक्ष ॥ ४३ ॥

दानीं च । 'तन्वान्' इति 'नीत्वैवास्यां' इति च पाठः ।

यस्यां भूमौ ते समारोप्य सद्यो रक्ष्यन्ते स्म क्षोणिपालेन लोकाः ।
तस्यास्तादृङ् नौ समत्वं स्मरन्तो भाषावाचा वञ्चिभूमिं किलाहुः ॥

सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः ।

निश्शत्रुत्वान्नैकधा गन्तुकामानेनान् मानैः स्वालयायानुमेने ।
पुण्योन्नीतस्यात्मवंशस्य युक्तं कीर्त्युल्लोचं तत्किमुच्चैर्विधातुम् ॥ ४५ ॥

संख्याया विधार्थे धा ।

चूर्णीसरित्तटे समाहृतस्य क्रतोर्वर्णनम्—

पर्यायेण प्राप्य सर्वोऽपि धर्मस्तत्रैकध्यं भूमिपालेऽप्यमोमोत् ।
विप्रप्राग्र्यैः प्रार्थितो यायजूकैः सोऽभूत् प्रीत्या रक्षकः सप्ततन्तौ ॥

एकाद्धो ध्यमुञन्यतरस्याम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चूर्णीनाम्ना भूरिपुण्या स्रवन्ती यत्र द्वेधा शम्भुमूर्धप्रभग्ना ।
गङ्गा याम्या स्पर्धिनी तन्मुदे किं राजाकार्षीत्तत्तटान्तं प्रयागम् ॥

द्वित्र्योश्च धमुञ् ।

एकाकिन्यामेव यस्यां निलीनो भाति त्र्यक्षस्तद्रसाश्लेषहृष्टः ।
सेयं चूर्णी पुण्यतो जन्हुकन्यां भ्रष्टां शम्भोर्नातियायात् कथं वा ॥ ४८ ॥

एकादाकिनिच्चासहाये ।

तन्नेदिष्ठे पावने तीरदेशे यज्ञो राज्ञा यज्वभिस्तन्यमानः ।
सत्सामग्रीभावितो भूमिदेवैः सार्धं देवांस्तोषयामास पूर्णम् ॥ ४९ ॥

अन्तिकबाढयोर्नेदसाधौ ।

यज्ञे तस्मिन्नृत्विगाद्या द्विजेन्द्राः सर्वेऽप्यासंस्तापसाः कामरूपाः ।
तेजोरूपैस्तैर्युता यज्ञशाला साक्षाद् देवैरावृतेवावभासे ॥ ५० ॥

प्रशंसायां रूपप् ।

हस्तग्राहं गृण्हति क्षोणिदेवे यज्ञं सम्यक् पाहि विश्वम्भरेश ।
इत्युक्त्वासौ स्वं करं देवदेश्यः सम्बुध्य्द्युक्तिं तां बहुव्रीहिमैच्छत् ॥

ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ।

श्रावं श्रावं सादरां सद्वाणीं भोजं भोजं भोज्यवर्गं मनोज्ञम् ।
पायं पायं क्षीरमिक्षो रसं वा मोदं मोदं त्रिर्नरोऽभुञ्जतास्मिन् ॥ ५२ ॥

द्वित्रिचतुर्भ्यः सुच् ।

क्षीरस्यन्तं वासितास्यन्तमस्मिन् दध्यस्यन्तं पायसस्यन्तमेत्य ।
विप्राः पङ्क्तौ पूरयामासुरिष्टं तुष्टात्मानः सप्तकृत्वोऽष्टकृत्वः ॥ ५३ ॥

संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ।

शाला साभूद् विप्रवर्ग्यैः प्रवर्ग्यैः सोमामर्दैः सोमसम्प्रीणनैश्च ।
शास्त्रादर्शैः कार्यनाणैश्च दर्शैस्त्रेतोत्कृष्टैर्वासकृच्चात्र काले ॥ ५४ ॥

एकस्य सकृच्च । 'त्कृष्टोवास' इति च पाठः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पूतैः स्वैस्वैर्भक्तिदत्तैर्हविर्भिः पुष्टास्तुष्टा देवता यज्ञवाटे ।
धृत्वा कीर्तिं भूपतेस्तत्प्रदत्तान् हारव्रातान् प्राभृतानीव रेजुः ॥ ५५ ॥

देवात् तल् ।

वृत्ते तस्मिन् यज्ञवर्ये स राजा विप्रप्राग्र्यान् दक्षिणो दक्षिणीयान् ।
नत्या सूक्त्या चोन्मनीकृत्य तेभ्यः प्रादान्नानावित्तवर्षैः प्रमोदम् ॥५६॥

अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च ।

चूर्णीतीरे चालयानालयान्तं वृत्त्यै भूमीश्चालयोपान्तदेशे ।
भूदेवत्रा भावयित्वेतरांश्च धन्यांश्चक्रे भूरिदानैः स भूपः ॥ ५७ ॥

देये त्रा च ।

मातुलमहाराजस्य गुणवर्णनं, कालप्रातिकूल्याद् राज्यभारं ज्येष्ठभागिनेये कथानायके निक्षिप्य स्थितस्य मातुलस्य राज्ञो देहवियोगवर्णनं, मातुलवियोगाद् व्यथितहृदयस्यापि कथानायकस्य भरणारम्भवर्णनम् —

दिव्योद्गीतस्फारकीर्त्तिर्गुरुर्नः क्षोणीभर्त्ता रामवर्माभिधानः ।
प्रीत्यै प्रोक्तो वां यथाप्तोपदेशं प्रख्यातानां कीर्त्तनं कीर्त्तये हि ॥ ५८ ॥

देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्। 'यथार्थोपदे' इति च पाठः ।

इत्थं नृपः कुशलपुरःसरीं कथामुक्त्वाथ तौ प्रमदभरादिवानतौ ।
लब्धाशिषावनुमतवान् कुमारकौ गन्तुं गृहान् सपदि धरावरोरसे ॥५९॥

अग्राख्यायामुरसः ।

तस्मिंश्चिरादवति महीं क्रमागतां रात्रिन्दिवप्रहितहृदन्तरे हरौ ।
सर्वाः प्रजाः परमदयात्मनि प्रभौ श्वःश्रेयसं प्रमुमुदिरे भृशं गताः ॥

श्वसोवसीयः श्रेयसः ।

समस्तभूतेष्वपि पाञ्चभौतिकं प्रपञ्चमालोकयतः प्रणश्वरम् ।
समानसम्पद्विपदस्य भूपतेर्विरागिणी भक्तिरभूज्जनार्दने ॥ ६१ ॥

द्वन्द्वाच्चुदषहान्तात् समाहारे । 'विरक्तिमान् भक्ति' इति च पाठः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कीर्त्या प्रजात्राणजया द्युमार्गस्थूलङ्करिण्या विविधैश्च भोगैः ।
वित्तैश्च पात्रग्रहितैः कृतार्थो राजा सदाऽध्यात्मिकतत्परोऽभूत् ॥ ६२ ॥

अनश्च ।

दुरत्ययो यः खलु सर्वजन्मिनां प्रियातिथिश्चापि विनिश्चितात्मनाम् ।
तदा प्रपेदे सहसोपभूभृतं महान् स कालो जनविप्रियक्रियः ॥ ६३ ॥

झयः । 'सहसेव भू' इति च पाठः ।

क्षणात् समाहूय युवावनीशं तस्मिन् समारोप्य च राज्यभारम् ।
सहोदरन्यस्तभरे स कालः स्वमानि पद्माक्षपरेण तेन ॥ ६४ ॥

अक्ष्णोऽदर्शनात् ।

तदनु सुदिवे नाकं प्राप्ते नृपे निजमातुले
व्यसनजलधौ निर्भग्नात्मा महीभृदनन्तरः ।
सह जनतया किञ्चित्कालं पुनः सदयस्तत-
स्त्वरितमुदगादुन्नेतुं तामनन्यसमाश्रयाम् ॥ ६५ ॥

सुनातसुग्धसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः ।

सम्प्रार्थितो निजजनैः स विरक्तचेताः
स्मृत्वा गुरोरपि वचः पदमाललम्बे ।
श्रीरामवर्मनृपतिर्महनीयमेधाः
सम्यक् स्मरन्नृषभमुख्यधराधिपत्यम् ॥ ६६ ॥

नित्यमसिच् प्रजामेधयोः ।

मार्त्ताण्डदेवविरहात् परिहीणतेजाः
प्राप्तो महत्पदमदः करसम्प्रदत्ताम् ।
उद्यन्नृपो मृदुकरः स्पृ:णोयधर्मा
तापातुरान् शिशिरयन् समुवाह लक्ष्मीम् ॥ ६७ ॥

धर्मादनिच् केवलात् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आश्लेषिकाभविहितावतरस्य मान्य-
श्रीवञ्चिभूमितिलकस्य महामहिम्नः ।
श्रीरामवर्मवसुधाधिपतेश्चरित्रे
सर्गः समाप्तिमितवानिह पञ्चमोऽयम् ॥ ६८ ॥

'वर्मविपुलाधिपते' इति च पाठः ।

इति श्रीरामवर्ममहाराजचरित्रे पञ्चमः सर्गः.

अथ षष्ठः सर्गः.

विवाहरूपरूपकन्यायेन कथानायकस्य राज्यलक्ष्म्याः प्राप्तेर्वर्णनम्—

अथ नृपः सुकृतास्पदमास्पदं निजमुपेत्य गुणैर्गुणयन् श्रियम् ।
भुवि जनावनसादरमानसः प्रकृतिगीतगुणः शुशुभेतराम् ॥ १ ॥

एकाचो द्वे प्रथमस्य ।

अविवृषत्यवनिर्निजवल्लभे नरपतौ कुतुकान्निखिलाः प्रजाः ।
परिपुपोष विशेषसमृद्धिभिः प्रियहितप्रयता हि कुलाङ्गना ॥ २ ॥

अजादेर्द्वितीयस्य । 'त्यवनीर्नि' इति च पाठः ।

सुकृतमर्चिचिषत्यधिपे जना गुणवशादपि पूर्वमहीपतेः ।
प्रतुतुषुः सहकारतरौ यथा सुमलयेऽपि फलोत्करदर्शनात् ॥ ३ ॥

न न्द्राः संयोगादयः । 'ये विफलो' इति च पाठः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भुवनभूषणमुद्भटविक्रमैः परिचिकासदमोघमनोरथः ।
अवनिजानिरसौ समुपागतामुदवहद् विधिनैव नृपश्रियम् ॥ ४ ॥

जक्षित्यादयः षट् । 'नृपः श्रियम्' इति च पाठः ।

उपयमे प्रकृतेऽत्र महीभृतः सुमहितैव शचीजनलालसा ।
इह तु यां परिपूज्य जनः सुखादधिविवाहमविघ्नमगार्यते ॥ ५ ॥

सन्यङोः ।

अथ नियोजनमेव गुरुर्गुरोर्निखिलमन्त्रचणः समजङ्गमीत् ।
नृपवरेण यथाविधि योजयन् श्रियमखण्डितरूपविभूषणाम् ॥ ६ ॥

यङ्लुक् ।

जितमहीपतिमूर्धसमादृतप्रथितसूनकमण्डलुनिस्सृतैः ।
श्वशुरकर्म पयोभिरवर्वृतीद् वरपदद्वयसेचनमादरात् ॥ ७ ॥

उदाहरणान्तरम् । 'परपद' इति च पाठः ।

महितबुद्धिकुशाग्रपरिस्तृते शुचितमे ज्वलने निजतेजसि ।
अहतनूत्नतरांशुकभूषणः प्रविदधाविह साक्ष्यविधिं नृपः ॥ ८ ॥

जुहोत्यादिभ्यः श्लुः ।

समजुहोदमुनाप्यनुकम्पिता प्रियतमात्र च लाजगणान् सितान् ।
स्वपरिपन्थिसुगन्धियशोमयान् हुतभुजि प्रतिदीप्तशिखावलौ ॥ ९ ॥

उदाहरणान्तरम् ।

तदनु सत्वरमेतदुदित्वरीं तदयशोमयधूमशिखां क्षणम् ।
विविधचारसमीरसमाहतां स शिरसा नमितेन तदोढवान् ॥ १० ॥

वचिस्वपियजादीनां किति ।

स्वपरदैवतसन्निधिगो नृपः स जगृहे नु यदा मणिमुद्रिकाम् ।
तदुदयत्किरणच्छलतः करः सपुलकोऽस्य करग्रहणाच्छ्रियः ॥ ११ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ।

प्रथममेव नृपैरुपदीकृतं मुखमनर्घमणिप्रकरं श्रियः ।
उपनिनाय च मानविजिहती क्षितिपतिः सकृदेव विलोचने ॥ १२ ॥

णो नः ।

स तु तमेव कृशानुमथाकृशं सुजनकौतुकदं प्रमदान्वितः ।
समतनोच्च परिक्रममानितं गुरुनियोगमुपेत्य यथाविधि ॥ १३ ॥

ह्रस्वस्य पिति कृति तुक् ।

तदनु चाक्षतसम्मिलिताशिषो विदधिरे नरनायकमूर्धनि ।
सुमहिते चतुरग्रथितस्रजा द्विजगुरुस्वजनैरुचितक्रमात् ॥ १४ ॥

वेरपृक्तस्य । 'गुरुःस्र' इति च पाठः ।

पुरनिवेशपरोऽथ धरावरः करिपुषाफलतोरणचारुणा ।
निरगमत्तरसा रथवर्त्मना नरदृशां रचयन् परमोत्सवम् ॥ १५ ॥

आद्गुणः ।

नायकस्य आट्टङ्ङल्नगरयात्रामुपक्षिप्य सेनावर्णनम्—

अनुगतास्तमथाशु सहस्रशः परिजनाः पुरतः पृतनाचराः ।
वलयमार्गनिरन्तरपूरणादचलिताः प्रतिमा इव रेजिरे ॥ १६ ॥

अकः सवर्णे दीर्घः ।

युवतयोऽपि कटाक्षमृदुस्मितैः सपदि लाजविमोक्षणमादधुः ।
अपजगाम तदत्र गतो जनः कुवलयावलिकुन्दविमिश्रितम् ॥ १७ ॥

एङः पदान्तादति ।

इति यथाविधि तत्र महामनाः स परिणीय क्षिताम्बधिराट्श्रियम् ।
भुवनगेहपतित्वमुपेयिवान् समवितुं यतवानखिलाः प्रजाः ॥ १८ ॥

हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ नदीतटगेहनिवासिनीं भगवतीं तरसा परदेवताम् ।
नरवरः स युधिष्ठिरसान्यधीर्निरगमत् स्वपुरात् प्रविवन्दिषुः ॥ १९ ॥

गवियुधिभ्यां स्थिरः ।

सपदि धीसचिवादिभिरादरादनुवृतोऽधिकृतैर्बहुभिर्नृपः ।
रिपुविमाथिचमूसहितस्तदा प्रचलदर्णवभासमुपाददे ॥ २० ॥

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ।

सकुथगर्जितवारणपृष्ठगैर्धृतपताकसुवर्णमहागृहैः ।
शिशुदिवाकरदीधितिशोभिता जलधिकूटवरा अनुचक्रिरे ॥ २१ ॥

आन्महतः समानाधिकरणजातीययोः ।

चतुरधौरितका जवना हया रचितपङ्क्तिगता रुचिरोत्प्लुतैः ।
विरुरुधुर्बहुशः सह वीचिभिः मृदुलशीकरकेसरशालिनः ॥ २२ ॥

तसिलादिष्वाकृत्वसुचः ।

इभवरान् निकषा रथकुञ्जरः खचितहृद्यमणिप्रकरो बभौ ।
गिरिरिव प्रचलन् हिमवत्सुतो मणिमयो निजपादशतावृतः ॥ २३ ॥

हृदयस्य हृल्लेखयदण्लासेषु ।

अलघुयानगतः स ददर्श तां स्वपुरपार्श्वगतां नृवरो नदीम् ।
विमलहार्दजलां द्रुतमङ्कगां प्रियसुतामिव सह्यमहीभृतः ॥ २४ ॥

पूर्वस्योदाहरणम् ।

नदीवर्णनं नागरिकजलक्रीडावर्णनं च—

नृपतिना ददृशे तटिनीतटे स्थितवता कृतपद्धतिसङ्गमे ।
भ्रमसमुद्भ्रमणैः कृतखेलना सह जनैर्विहरद्भिरलं जले ॥ २५ ॥

हिमकाषिहतिषु च ।

क्वचन तत्र जनैर्ललनायुतैः सुविमलापतया पतयालुभिः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पयसि नागरिकैः शुशुभे तदा रसवशादुदधिप्रियवल्लभा ॥ २६ ॥

पेषंवासवाहनधिषु च ।

तदुदवासपरैर्महिलाजनैः कुचतटी प्रतिरुद्धजवा क्षणम् ।
कलुषिता घृसृणैः कुपितेव सा स्वमृदुभङ्गविभङ्गवशाद् बभौ ॥ २७ ॥

उदाहरणान्तरम् ।

प्रियतयेव पुरन्दरसुन्दरीसमगुणा रमणीः समुपागताः ।
उभयपार्श्वगतौघमिषादियं भुजयुगेन पृथक् परिषस्वजे ॥ २८ ॥

वाचंयमपुरन्दरौ च ।

स्तुतिजयादनवस्थितया भयाद् गलतले मिलितः प्रियया प्रियः ।
न हि चुकोप नदीं प्रति सागसं हितफलः सुसहः खलु विप्रियः ॥२९॥

तस्मान्नुडचि ।

तव मुखेन विखण्डितवर्ष्मणः किमु कलाः शशिनः शरणं गताः ।
इति जगाद नखक्षतवीक्षणात् कुचयुगे स जलाहृतकुङ्कुमे ॥ ३० ॥

नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या ।

तदुदकैरथ कापि गताञ्जने प्रकृतिसौभगभाजि विलोचने ।
प्रियसमर्पितरागभरेऽप्यहो कुवलयस्य जहौ न सरूपताम् ॥ ३१ ॥

ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु ।

करसरोजयुगं प्रधुनानया चलितया परया सलिलोपरि ।
ह्रदविलङ्घनकातरया वरो विसदृशप्रणयादुपगूहितः ॥ ३२ ॥

दृग्दृशवतुषु ।

स्मर कवोष्णमदीयरदच्छदप्रविलयादपयात्विह वेपथुः ।
त्वदधरस्य सखीति हसन् प्रियः करजलैर्मुखतः प्रहतोऽन्यया ॥ ३३ ॥

कवं चोष्णे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कचपटाहरणात् कुचपीडनात् तिलकचन्दनकुङ्कुममार्जनात् ।
प्रकुपिता इव तावदताडयन् घुमुघुमुध्वनिचारुकरैर्नदीम् ॥ ३४ ॥

आ सर्वनाम्नः । दृग्दृशवतुषु ।

इति विलासभरानवलोक्य ते निजसमीपगतास्त्वथ कामनाः ।
स्ववनितासु सुखेन विलासिनीपदमबोधिषतानुगतार्थकम् ॥ ३५ ॥

द्व्यन्तरुपसर्गेभ्योऽप ईत् ।

पुलकनेत्रनिमीलनवेपथुप्रचुरसीत्करणाधरदंशनैः ।
शिशिरजैरपि कापथचेतसो मदनविभ्रममासु विबभ्रमुः ॥ ३६ ॥

का पथ्यक्षयोः ।

इति नृणां रसकुर्दनकारिणीं स तु नदीं निजनीवृदलङ्कृतिम् ।
सुखमवेक्ष्य ययौ स्वपुरं मुदा मृदुलकच्छतलेन ससैनिकः ॥ ३७ ॥

नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ।

देवीसमाराधनकथनम्—

अथ समर्च्य गजार्पणपूर्वकं त्रिविधसत्कृतिभिः परदेवताम् ।
द्विजगणान् वसुभिश्च पुना रसात् स्ववरसौधमगात् कृतकृत्यधीः ॥३८॥

ढ्रलोपे पूर्वस्य दीर्घोऽणः ।

विश्रमार्थं मञ्चमधितिष्ठतो नायकस्य वर्णनं, तदा पूर्वभागदृष्टस्य सह्याद्रेर्वर्णनं च—

तदनु सह्यजपाद इवोन्नतः स नृपतिं किमु वोढुमनाश्रिरम् ।
सपदि सह्यनगप्रवरं ददौ नृपदृशोरुपदां प्रमदप्रदाम् ॥ ३९ ॥

सहिवहोरोदवर्णस्य ।

धुरि कृषीवलवाञ्छितपूरणे धृतरसैर्निजपार्श्वसमुद्गतैः ।
स्फुटविधूतपतत्रमिवाम्बुदैर्नृपसमीपसमुत्पतनेच्छया ॥ ४० ॥

चले ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वभवपीनशिखोपरि नाकिनः किमपि विश्रमणाद् गगने गतौ ।
सुरगिरेस्तुलनामिव साधितुं सुरनिवासतयाप्यधिकोन्नतः ॥ ४१ ॥

हलः । 'नाकिनां कि' इति च पाठः ।

परिगतैर्धवलाकृतिभिर्घनैरघनमूर्तिभिरम्बुवियोगतः ।
सुरनदीसमयापगयाप्यलं हिममहीध्रमतिं ददतं नृणाम् ॥ ४२ ॥

नृ च ।

जलधिना प्रचलोर्मिकरैर्निजैः कलितपादतलं मृदुनिःस्वनम् ।
मुनिवरः सुयशाः कलशोद्भवो यमधितिष्ठति मान्यतयेति किम् ॥ ४३ ॥

अत्वसन्तस्य चाधातोः ।

सितविधूतसुमस्मितसुन्दरं चलचलद्रुममस्तककम्पनैः ।
किमपि मानयमानमिवादरात् तमुपशान्तमतिं धरणीपतिम् ॥ ४४ ॥

अनुनासिकस्य क्विझलोः क्ङिति ।

स्वशरणं तिमिरं कृशतादयावशतयावति यः स्वगुहागृहे ।
निशि तु हन्ति तितांसदथोद्धतं तदखिलं च महौषधिदीप्तिभिः ॥ ४५ ॥

तनोतेर्यकि ।

बहलचन्दनचारुपरिष्कृतो धवलनिर्झरहारलसद्वपुः ।
सतिलको विकसत्सुममालिकः स्मरसुखे प्रसजन्निव भाति यः ॥ ४६ ॥

दंशसञ्जस्वञ्जां शपि ।

प्रकटकिंशुकसूननखक्षताः पृथुलतालकुचातिमनोहरीः ।
निजतटीः सुनितम्बविभासिता धृतरसाश्च परिष्वजते सुखम् ॥ ४७ ॥

उदाहरणान्तरम् ।

करिवरैर्विहरद्भिरितस्ततो दशनरश्मिमनोज्ञतराननैः ।
निकटखेलनरागसमाकुलैर्लसति यः शिशुभिः स्वभवैरिव ॥ ४८ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

घञि च भावकरणयोः।

उद्यानयात्राकथनम् उद्यानवर्णनं च—

इति विशिष्टमहीध्रवनश्रियं स तु विलोक्य तदा हृतमानसः।
प्रतिविवेश निजोपवनं पुनर्लसदुपत्यकभूतलविस्तृतम् ॥ ४९ ॥

शास इदङ्हलोः।

नृवर किं करवायिह शाधि मामिति नतेन नृपो वनरक्षिणा।
सपदि दर्शितपद्धतिरभ्यगादुपवनं पवनं मृदुलं भजन् ॥ ५० ॥

शा हौ।

निजगदेऽनुगतेन नृपोऽमुना भुवननाथवनी सुचिरादियम्।
बहुफलाप्यभवत् सफलाधुना शुभवतां भवतां गमनादिति ॥ ५१ ॥

अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति।

अथ पदा परिगत्य वने क्वचित् सरुचकान् वनपालकदर्शितान्।
सुखमपश्यदिवात्मनिरीक्षणाज्जनमतो नमतो बहुभिः फलैः ॥ ५२ ॥

वा ल्यपि।

नृपतिनैक्षि सरोषकुतूहलं क्वचन लालितबाललताभवम्।
विकसदप्यतिभूर्ततयालिना मुकुलमाकुलमास्वदनादरात् ॥ ५३ ॥

निष्ठायामण्यदर्थे।

पवनपोतविलासविनर्त्तिता भ्रमरगीतियुता लतिकाः क्वचित्।
नरपतेर्विदधुः परमां मुदं नवसुमा वसुमानितसम्पदः ॥ ५४ ॥

आतो लोप इटि च।

मृदुभृशारुणपल्लवतल्लजैर्विलसतो हरिचन्दनशाखिनः।
श्रवणदेयदलस्य तदाभवद् रुचिरता चिरतापहरी विभोः ॥ ५५ ॥

ईद्यति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स मुमुदे प्रगणय्य दृशा भृशं क्वचिदशोकतरुं भ्रमरैश्रितम् ।
मधुनिपानवशान्निजवर्ष्मणां गुरुतया रुतयानसुमन्थरैः ॥ ५६ ॥

ल्यपि लघुपूर्वात् ।

तदनु रक्तमुखान् मृदुकण्टकान् पुलकितप्रमदाकुचसन्निभान् ।
स तु निपाय दृशा वरडाडिमानरमतारमतालफलावमान् ॥ ५७ ॥

न ल्यपि ।

प्रहिणु भूपदृशाविह मा स्म भूद् भृशविलम्बनमन्यविलोकनात् ।
इति स हूत इवैक्षत मालतीं स्वनवता नवताण्डविनालिना ॥ ५८ ॥

न माङ्योगे ।

स्मितलवैः परिहृत्य सुमश्रियं सरसमारसमानवपुः श्रिया ।
विरहिखेदकरीत्यथ सा समयादुपरतापरतापहृता कृता ॥ ५९ ॥

अचिश्नुधातुभ्रुवां य्वोरियङुवङौ ।

जनयति स्म नृपस्य हि शं वरा नयनयोः स्फटिकामलशम्बरा ।
मुखरिता भ्रमरैः सुमरेणुभिः कमलिनी मलिनीकृतविग्रहैः ॥ ६० ॥

मितां ह्रस्वः ।

हसितयेव तदा सितयामुया सुचिरगाथितनाथनिरीक्षणात् ।
भृशमशामि नृपस्य वनश्रमप्रविसरो विसरोचिरुपेतया ॥ ६१ ॥

चिण्णमुलोर्दीर्घोऽन्यतरस्याम् ।

इति चरन् वनपालसखश्चिरं मधुयुतो मदनस्तनुमानिव ।
कुमघवाथ महत्सु निवृत्तवानवनतो वनतोऽवनतत्परः ॥ ६२ ॥

मघवा बहुलम् ।

द्वित्राणि तत्र दिवसानि विलम्ब्य नृणां
नेत्रोत्सवं पथि दविष्ठदिगास्थितानाम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तन्वन्ननन्तपुरमेव ततः ससैन्यः
प्रागात् स्थविष्ठगुणवानजितोत्सवार्थम् ॥ ६३ ॥

स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः ।

श्रीपद्मनाभोत्सवार्थं नायकस्य आट्टिङ्ङल्नगराद् अनन्तशयनप्रत्यागमनवर्णनम्—

पुरी तेन प्रापे सिततरपताकाभिरभितः
कृताभिः शुभ्राङ्गी सुररिपुमहायोपरितले ।
उदस्थादायान्तं चिरविरहपाण्डुर्नृपवरं
निजप्रेष्ठं द्रष्टुं नगरवरलक्ष्मीरिव मुदा ॥ ६४ ॥

प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः ।

आश्लेषिकाभविहितावतरस्य मान्य-
श्रीवञ्चिभूमितिलकस्य महामहिम्नः ।
श्रीरामवर्मवसुधाधिपतेश्चरित्रे
सर्गः समापनमुपागमदत्र षष्ठः ॥ ६५ ॥

'र्मविपुलाधिपते' इति च पाठः ।

इति रामवर्ममहाराजचरित्रे षष्ठः सर्गः.

—:*:—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ सप्तमः सर्गः

श्रीपद्मनाभालयवर्णनम्—

जयति श्रुति पुरातनैः प्रगीतो मुनिभिरनन्तपुरालयो हि यस्मिन् ।
विलसति भगवाननन्तशायी सह रमया क्षमया च पद्मनाभः ॥ १ ॥

युवोरनाकौ ।

स्मरणमपि यदीयमत्र काले दुरितहरं परमामनन्ति सन्तः ।
सुकृतमथ तदीयदर्शनोत्थं भुवनतले सनिदर्शनं भवेत् किम् ॥ २ ॥

आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ।

श्वशुरगृहसुखं चिराय न स्यादिति वरुणालयमुत्सृजन् रमेशः ।
निवसति कुलशेखरादृतात्मा सह रमयात्र सुखेन भक्त्यधीनः ॥ ३ ॥

उदाहरणान्तरम् ।

दधति मणिगणाः फणागणस्था भुजगपतेर्दधतो हरिं स्वभोगे ।
सजलजलधरोपरि स्थितानां वियति रुचिं रुचिरात्मनामुडूनाम् ॥ ४ ॥

अदभ्यस्तात् ।

मुररिपुमुखमध्यपाददेशाः समुचितलोकनिरन्तराश्रितत्वात् ।
त्रिभुवनमहितात्मतां वदन्तः स्फुटमररैस्त्रिभिरासते हि यत्र ॥ ५ ॥

आत्मनेपदेष्वनतः ।

अलभत हि शिलापि तावदैक्यं खलु महती पुरतः श्रिता मुरारेः ।
तदिह बहुगुणैर्जनैरमीभिः किमिव भवेदभिवाञ्छितं न लभ्यम् ॥ ६ ॥

नेदमदसोरकोः ।

उपरि च मणिहेमस्तूपिकाभिः शयनगृहं तिसृभिर्हरेरमुष्मिन् ।
लसति मुररिपुस्त्रिमूर्त्तिभावं निजमिव बोधयितुं त्रिभिः प्रकाशैः ॥ ७ ॥

ङसिङ्योः स्मात्स्मिनौ ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कठिननखरभीषणोर्ध्वजानुप्रसृतभुजापरिघः प्ररूक्षचक्षुः ।
निखिलदुरितकुञ्जरान् प्रभिन्दन् मुदमिह पुष्यति दक्षिणे नृसिंहः ॥ ८ ॥

पूर्वादिभ्यो नवभ्यो वा ।

अखिलहृदयनन्दनाङ्गयष्टिर्निलयवरे वसुदेवनन्दनोऽस्मिन् ।
दिशति निखिलमङ्गलानि नृणां दिशि भृशमुत्तरतः किशोररूपः ॥ ९ ॥

जश्शसोः शिः ।

सुखयति विदुषां गणाद् द्विजानां श्रुतिरुदिता खलु यत्र मण्टपस्थात् ।
श्रुतिरसमृदुनिःश्वसद्भुजङ्गप्रवरचलेतरभोगभाजमीशम् ॥ १० ॥

विदेः शतुर्वसुः ।

विलसति कुलशेखराख्यशाला सुघटितकौशलविश्वकर्मक्लृप्ता ।
न किमिति जगतां मुदं त्रयाणां वहति शिलामयकल्पितापि यत्र ॥११॥

त्रेस्त्रयः । 'विलसितकुल' इति च पाठः ।

रुचिरकनककेतनस्य यस्मिन् मुरमथनस्य पुरः स्थितस्य भासा ।
भृशतरकपिशाः समस्तदेशाः कनककृता इव नन्दनीयशोभाः ॥ १२ ॥

इदितो नुम् धातोः ।

यदुपरि तु विलम्बनोपलम्भाद् दिवसपतेरनुवासरं प्रमन्ये ।
अरुणगरुडयोः समीपभाजोर्भवति चिरं सहभाषणं मुदेति ॥ १३ ॥

उपात्प्रशंसायाम् ।

इह शिवबलिशालिकापि शैली गुणसुलभा कुरुते सुखं विशाला ।
रुचिरपटपरिष्कृता जनानामतिमहितानिशभक्तपूरणेन ॥ १४ ॥

न सुदुर्भ्यां केवलाभ्याम् ।

पृथगपि चतुरश्रखण्डरूपप्ररचितमण्टपषण्डमण्डिता सा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हरिपरिचरणार्थिनां विमानैस्त्रिदिवजुषामिव दुर्लभैः प्रपूर्णा ॥ १५ ॥

उदाहरणान्तरम् ।

सुरसरणिमिलच्छिखः स यस्मिन् लसति पुरोभुवि गोपुरोऽभिरूपः ।
नभसि पुनरलम्भि पुष्पवद्भ्यामयनयुगं यमवेक्ष्य रुद्धमार्गम् ॥ १६ ॥

विभाषा चिण्णमुलोः ।

अतिविपुलतयात्र भात्यृभुक्षाः क्वचिदमराश्च परत्र भूतसङ्घाः ।
हरिगजमृगपङ्क्तयोऽन्यदेशे वहति विराट्छ्रियमेष विश्वरूपः ॥ १७ ॥

पथिमथ्यृभुक्षामात् ।

अधरभुवि निजेऽत्र लासिकानां नटनविधौ सह गीतिभिः प्रवृत्ते ।
प्रतिरवमिषतः स्वयं च गायन्नयमनुमोदयते परं पुमांसम् ॥ १८ ॥

पुंसोऽसुङ् ।

मणिगणरुचिभिः प्रवृद्धतेजा वरणमिषाध्दृतयोगपट्टबन्धः ।
हरिमपि हृदये दधत् स्थिराङ्गो हरिनिलयः किमसौ समाधिकर्त्ता ॥ १९ ॥

ऋदुशनस्पुरुदंसोऽनेहसां च ।

अमुमपि परितस्त्रयीप्रधाना धरणिसुराः श्रुतिगीतिमाधुरीभिः ।
पिपुरतिनयनानि सर्पराजो हरिशयनस्य फणाभिवृद्धये किम् ॥

उदोष्ठ्यपूर्वस्य ।

उत्सववर्णनम्—

इति नयनमनोहरे तदानीं जनसुकृतात्मनि पद्मनाभगेहे ।
कमपि वरमहं नृपो विधास्यंस्तदुचितवस्तु च मानसावचैषीत् ॥ २१ ॥

सिचि वृद्धिः परस्मैपदेषु ।

दिशि दिशि सहसौर्णवीद्वितानैः पृथुतरमम्बरमुच्चतोरणाद्यैः ।
वपुरपि निजमम्बरैर्महार्घैर्निजवपुषा च तलं भुवो जनौघः ॥ २२ ॥

ऊर्णोतेर्विभाषा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उपविशत समाजचैततृप्तिं धरणिसुरा वदतेष्टमित्यजस्रम् ।
सुखमतिमहिताः स्वभुञ्जतैते क्वचन गुणैर्वसुधेश्वरप्रदिष्टैः ॥ २३ ॥

नेड्वशि कृति ।

युतमिह मृदुशिञ्जितैः सुगीतैः पणवसमावृतवल्लकीनिनादैः ।
नटनमपि जहार नर्त्तकीनां क्वचन जनस्य हि सर्वतोऽपि चेतः ॥ २४ ॥

श्र्युकः किति ।

अशनसुखमतोऽपि गीतिभेदान् नटनकला बहलाङ्गरागमालाः ।
करणगणमहो सदा जिघृक्षुं न समनुयातुमलं जनस्य चित्तम् ॥ २५ ॥

सनि ग्रहगुहोश्च ।

बलिकुतुकविलासयानलक्ष्म्यां नृपतिलकेन मुखे विभूषितायाम् ।
दशशतनयनो बुभूपुरासीदखिलजनोऽपि च दृश्यवर्गलोभात् ॥ २६ ॥

उक्त उदाहरणम् ।

समविभवमनन्तवाहनस्थः स हि नृहरिं हरिरन्तरेण कृष्णम् ।
तदुचितमणिभूषणैः प्रदीप्तो जननयनेषु सुधां किरन् पुरोऽभूत् ॥ २७ ॥

श्वीदितो निष्ठायाम् ।

मृदुलमधुरवाद्यशस्तगीतैः श्रुतिनुतिभिर्जनदृष्टिपुष्पवर्षैः ।
उपचितमहिमा चलन् व्यलासीन्मधुमथनः पुरतोऽस्य चावनीशः ॥२८॥

धृषिशसी वैयात्ये ।

क्वचन स कमलासने स्थितोऽभून्निजरमणीदृढवासकौतुकात् किम् ।
व्यचरदपि विशिष्य तत्र लक्ष्मीस्तदनु तथाविधमीक्षितुं प्रियं किम् ॥

दृढः स्थूलबलयोः ।

अभजत तमथेन्द्रवाहनस्थं कृतकुमुदं स्फुटपुण्डरीकदृष्टिम् ।
दिगिभविचलनाद् भियेव लोकः सकल इहाञ्जनसुप्रतीकहृष्टम् ॥ ३० ॥

हृषेर्लोमसु ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इह खलु विबुधेन्द्र एष भक्तो मम भवितास्मि तदस्य वाहनस्थः ।
इति किमु शिबिकोत्तमाधिरूढो हरिरलसद् बहुमानयन् महीन्द्रम् ॥२१॥

आर्धधातुकस्येड् वलादेः ।

शुचमुपशमयन्निवान्ययानप्रभवमहो विनतासुतस्य पृष्ठे ।
पुनरधिकमदीपि पद्मनाभो भृतकशुचो बहुदुःसहा हि गोप्तुः ॥ ३२ ॥

स्वरतिसूतिसूयतिधूञूदितो वा ।

अवभृथस्नानार्थं शङ्खमुखाख्यसमुद्रतीरं प्रति यात्रावर्णनम्—

इति सरसमहर्दिवं सुहृद्भिर्नवसु गतेषु दिनेषु मेदुरेषु ।
शुचिमपि पवितं विधातुमैच्छन् दशमदिने हरिमाप्लवेन भक्ताः ॥ ३३ ॥

पूङश्च ।

गरुडगलसुशोभिताङ्घ्रयष्टिर्निजसमपार्श्वगकृष्णनारसिंहः ।
द्विरदसमुषितान्यदेवयुक्तः स तु निरगान्मुरहा नृपाग्रयायी ॥ ३४ ॥

वसतिक्षुधोरिट् ।

अपररसधितीरमात्तसैन्ये जिगमिषति क्षितिपे हरेः पुरस्तात् ।
निजनिजवरमुद्रिकात्तशोभाः सचिववराः परितोऽगमंस्तदीयाः ॥ ३५ ॥

गमेरिट् परस्मैपदेषु ।

प्रतरलकरवालचारुहस्तः कनकपटोत्तरभासमानकान्तिः ।
व्यलसदमितवज्रकुण्डलाढ्यो हरिचरणौ शिरसा दधन्नरेन्द्रः ॥ ३६ ॥

आने मुक् ।

जलनिधिहरिगोपुरान्तपूर्णे जननिकरे परियातमन्त्रिवारम् ।
स्फुटपरिधिमिवेन्दुमत्र भूपं नभसि च निर्जरसो रसादपश्यन् ॥ ३७ ॥

जराया जरसन्यतरस्याम् ।

हरिधृतनवमालिकापरागैः पवनहृतैरणुभिः सुरस्त्रियस्ताः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निविडतरपरिष्कृतालकान्ता वियति विरेजुरथंनहृष्टकान्ताः ॥ ३८ ॥

त्यदादीनामः । 'णुभिः सुरेन्द्ररामाः । निवि' इति च पाठः ।

नृपतिसरणिपार्श्वमञ्चपङ्क्तौ विविधपरिष्कृतिजालकावृतायाम् ।
सुरयुवतिसमानरूपवेषा महमगमन्नमुमीक्षितुं नृयोषाः ॥ ३९ ॥

उदाहरणान्तरम् ।

सनमनमभिदृष्टपङ्कजाक्षा युवजनधैर्यविलोपिसत्कटाक्षाः ।
त्वरितमुपनिविष्टतद्गवाक्षाः प्रपपुरिमा नयनैर्नृपं विलक्षाः ॥ ४० ॥

इदमो मः । 'नयनैरिमं वि' इति च पाठः ।

तदनु च युवभिर्विसारिनेत्रैः परमसुखं प्रतिजालमीक्ष्यते स्म ।
अखिलहृदयहारिणि स्फुटेऽब्जे शशिशकलं स्पृहणीयमध्यविन्दु ॥ ४१ ॥

अचो ञ्णिति ।

कुवलययुगलं भ्रमद्द्विरेफं तिलकुसुमं चलदीपलम्बिताग्रम् ।
मृदुलकिसलयं प्रकृष्टरागं सुविमलमीलितकुन्दकान्तमध्यम् ॥ ४२ ॥

अत उपधायाः ।

उपरि च कमलस्य कालमेघः सरसिजकुड्मलयुग्ममप्यधस्तात् ।
विवृतविशदकर्णिकं च पार्श्वे किमिति जवान्मुमुहेऽत्र कामविद्धैः ॥ ४३ ॥

उदाहरणान्तरम् ।

सरसपटहघातजन्यनादैः कनकमयैः सहसोच्चलैश्च खेटैः ।
जलनिधिमसितोर्मिभीमनादं सपदि विजेतुमिवाप राजसैन्यम् ॥ ४४ ॥

हनस्तोऽचिण्णलोः ।

स्वजयिकुतुकमप्यधायि विष्णोः करनिकरैरपराद्रिगेन पूष्णा ।
तदपि भृशमदीप्यतांशुयोगाद् गुणिषु गुणोद्यमनाय बाधनं हि ॥ ४५ ॥

आतो युक् चिण्कृतोः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अभिमुखमधितिष्ठतोस्तदानीं भवित्रविधायकविम्बयोस्तु हर्योः ।
प्रविसृतदृढरश्मिरज्जुबन्धैरुदधिरभूत् सुतरां किमूर्ध्वभागे ॥ ४६ ॥

उदाहरणान्तरम् ।

अदमि हरिरुचा यदा स्वगर्वः सपदि तदा तरणिः प्रहीणतेजाः ।
चरमगिरिगुहान्तरे निलीनो भिषति नृपे सभटे त्रपावशात् किम् ॥ ४७ ॥

नोदात्तोपदेशस्य मान्तस्यानाचमेः ।

अर्णववर्णनम् —

सपृतनमवगम्य रामशर्जं तटभुवि किं जलधिः स्वबन्धभीत्या ।
स्वशिरसि कृतताडनस्तरङ्गैरजनि करैः प्ररुदन्निवोच्चनादम् ॥ ४८ ॥

जनिवध्योश्च ।

भटचलितरजस्समूहपातान्निबिडजलो जलधिः सुमन्थरोर्मिः ।
निजसलिलविभागशङ्कया किं क्षणमथ मोहमुवाह बन्धनेन ॥ ४९ ॥

चजोः कु घिण्यतोः ।

पुनरपि सुभृशोच्चलत्तरङ्गा नृपपृतनां प्रजिघांसतेव नुन्नाः ।
सपदि जलधिना क्रुधा सुदूरात् सविधगतास्त्वभिशङ्कयेव भिन्नाः ॥ ५० ॥

अभ्यासाच्च ।

अपि च पुनरसेतुबन्धवाञ्छासमवगमादिव तेन सत्समाजे ।
व्यरचि तटतलेषु फेनलक्षान्नृपगमनाय सितांशुकप्रसारः ॥ ५१ ॥

अजिव्रज्योश्च ।

अथ स निजभुजैस्तरङ्गसंज्ञैर्नृपचरणौ जगृहे कृताग्रगाहौ ।
भ्रमविहितविरोधदोषशान्त्यै हृदि कलुषं नहि गृण्हते महान्तः ॥ ५२ ॥

भुजन्युब्जौ पाण्युपतापयोः ।

पतिरपि स नृणां नियोज्यवर्गानुदधितटेषु विसृज्य विश्रमाय ।
नदवरपरमादरप्रमोदादिव तमलोकत तुष्टदृष्टिपातम् ॥ ५३ ॥

प्रयोज्यनियोज्यौ शक्यार्थे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतिविपुलहृदं स्वतो गभीरं महदुपयोगकृते धृतामितार्थम् ।
नृपतिरमुमवेक्ष्य साध्वभावत् सम गुणदर्शनलालसा हि सन्तः ॥ ५४ ॥

शमामष्टानां दीर्घः श्यनि ।

हृदयकलितकृष्णवर्त्ममान्यं प्रचलितपाण्डुजलापविद्धधैर्यम् ।
प्रविपुलमथ भारतोपमानं नृपतिरपश्यदपां निधिं मनीषी ॥ ५५ ॥

पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ।

उडुपकुलविलासलोभनीये क्षितिभृदुपागतवाहिनीप्रकीर्णे ।
शकुनिपरिवृते नितान्तभीष्मे सरिदधिपे समवीक्षि भारताभा ॥ ५६ ॥

पुगन्तलघूपधस्य च ।

तरणिकुलनिविष्टवातजातप्रियसखदाशरथीड्यवेगयानम् ।
रघुवरचरितेऽम्बुधौ च बुद्ध्वा नृपतिरभूद् रसपूर्णतां च तुष्टः ॥ ५७ ॥

भूसुवोस्तिङि ।

सितजलजवराटिकाः सशुक्तीः प्रविसृतफेनपटान्तरप्रकीर्णाः ।
सरसशशिसितोपलांश्च पश्यन् स तु जलधेस्तटमापणं शशङ्के ॥ ५८ ॥

घेङिति ।

क्षणमिति परिलालिताक्षियुग्मो निखिलजनेक्षणलाल्यमानरूपः ।
स तु विधिवदचीकरन्मुरारेर्महमहिताप्लवमुत्प्लुतप्रमोदम् ॥ ५९ ॥

णौ चङ्युपधाया ह्रस्वः ।

सह स च सहसाप्लवेन मज्जन् नरकरिपोः स्वममीमृजद्विशिष्य ।
न जहति सुकृतं कुतोऽपि सन्तः समयगतं द्रविणं यथा प्रलुब्धाः ॥६०॥

उर्ऋत् ।

नायके मञ्चस्थिते चन्द्रोदयवर्णनम्—

जलपतिसविधस्थसौधपृष्ठं गतवति राजनि पश्चिमाद्रिगः किम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विधुरिति तदवेक्षि संशयघ्नः प्रथमधरेण समुह्यते स्म राजा ॥ ६१ ॥

उपसर्गाद् ह्रस्व ऊहतेः ।

विततवपुरदर्शि दृष्टमात्रे विधुरथ सङ्कुचिताङ्गसौम्यरूपः ।
अभिमुखनृपवीक्षणाद् विनीत्या किमु भृशमाद्रियते न केन मान्यः ॥

रिङ् शयग्लिङ्क्षु ।

मम नियतमहारि राजसंज्ञा कुवलयसौख्यमिहामुना प्रदत्तम् ।
हहह समसमुन्नतोऽयमास्ते धिगिति किमिन्दुरमन्दमुद्गतोऽभूत् ॥६३॥

दो दद्घोः ।

कमलवनमिदं किमेतदद्भिर्विरहितमात्मकराभिमर्शहृष्टम् ।
इति युवतिमुखान्यवेक्ष्य चिन्तावशग इवाथ स मन्दमन्दमागात् ॥६४॥

अपो भि ।

अखिलसुखकरोऽपि भूरिदुःखं सपदि चकार स चक्रवाकचक्रम् ।
वियुतमिथुनतावशेन लोके न हि सुलभः खलु सर्वहृद्यशीलः ॥ ६५ ॥

हलादिः शेषः ।

द्विजपरिवृढमान्त्रिकेण तावत् समभिहता करभस्मभिः सुपूतैः ।
तिमिरभरपिशाचिकातिकृष्णा सुनिववृते सहसा दिगङ्गनायाः ॥ ६६ ॥

उरत् ।

स्वहृदयदयितेन शीतभासा कुमुदवनी प्रमदाददिद्युतत् सा ।
प्रियकरकरलालिता तदानीं युवतिजनैः सह हर्म्यगैः सकान्तैः ॥ ६७ ॥

द्युतिस्वप्योः सम्प्रसारणम् ।

दिनकरविरहादतीव खिन्ना कमलवनी रजनीवराभियानात् ।
व्यसनभरनिमीलिताब्जनेत्रा कुलमहिलेव विविव्यथे कृशाभा ॥ ६८ ॥

व्यथो लिटि । 'वनी रजसा परा' इति च पाठः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किमिव न सुकृतं कृतं चकोर्या यदिह सुधांशुसुधामयांशुजालम् ।
इतरजनसुलभं निपीय हर्षः प्रियसुतया भृशमानशे तयाहो ॥ ६९ ॥

अश्नोतेश्च । 'प्रियसहिता भृ' इति च पाठः ।

स तु सपदि बभूव सागरोऽपि प्रगुणितफेनतरङ्गतुन्दिलाङ्गः ।
प्रियविरहसशोककोकयोषानयनभृशोष्णजलाभिसङ्गमात् किम् ॥ ७० ॥

भवतेरः ।

हिमकरकरसम्प्रहारशीते जगति वियोगदशा वशं गता तु ।
हृदि बत बिभराम्बभूव तापं व्यथितजनस्य गरायते सुधापि ॥ ७१ ॥

भृञामित् ।

स्थलजलधिविकारकारकत्वं मृदुरिति शीतकरः कथं जिहीते ।
इति हृदि विमृशन् सजायुवीर्यं तदधिपतां च नृपोऽस्य विस्मितोऽभूत् ॥

उदाहरणान्तरम् ।

अवभृथस्नानानन्तरं प्राकारान्तः प्रत्यागमनवर्णनम्—

पुनरथ कृतपद्मनाभकृत्या नृपपुरुषाः समसस्मरन्नरेन्द्रम् ।
समय इह विनिर्गतौ नियोज्यो नृप भवतेति स चाशु निर्गतोऽभूत् ॥

अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम् ।

अथ बलिकुतुकं गतः पुरस्ताद्
बलिकुतुकस्य हरेर्गतः पुरोऽवत् ।
अहमहमिकया विलोकनोत्कान्
पटहरवैः समतत्वरत् सलोकान् ॥ ७४ ॥

उदाहरणान्तरम् ।

गोविन्दे नरपालके भटजने नागेन्द्रवाहादिके :
स्वं नेत्रं परिवर्तयत्सु मनुजेष्वासीत् स्वगेहे हरिः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्थं श्रीरमणोत्सवं विरचयन् वञ्चीश्वरः सादरं
तत्पादे समवप्रथद् दृढतरां भक्तिं जनानन्ददः ॥ ७५ ॥

उदाहरणान्तरम्।

आश्लेषिकाभिहितावतरस्य मान्य-
श्रीवञ्चिभूमितिलकस्य महामहिम्नः ।
श्रीरामवर्मवसुधाधिपतेश्चरित्रे
सर्गः समाप्तिमितवानिह सप्तमोऽपि ॥

'र्मविपुलाधिपते' इति च पाठः ।

इति रामवर्ममहाराजचरित्रे सप्तमः सर्गः.

—:*:—

अथाष्टमः सर्गः.

राज्ञः सद्धरणेन प्रजासौख्यकथनम्—

पद्मनाभशरणेन नृपेण प्रपिताखिलसुखोऽथ जनोऽस्मिन् ।
भूपते जयजयेति सतोषं भारतीं प्रतिददाति सदास्मै ॥ १ ॥

सर्वस्य द्वे । नित्यवीप्सयोः ।

दौर्मनस्यमपि धार्मिकराजः क्ष्मामिमां परिपरि प्रतियाति ।
अन्धकारमिव तामविलुप्तां भानुभासमभितः प्रचरन्तीम् ॥ २ ॥

परेर्वजने ।

सूर्यो नृपतिना मणिसौधे मानितास्तपनमार्गमधोऽधः ।
तद्यशोहिमकरांशुविकीर्णे जानते न परसौरवितापम् ॥ ३ ॥

उपर्यध्यधसः सामीप्ये ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृष्टिकृष्टिरवनीशसभेऽस्मिन् न प्रवेष्टुमपि वष्टि विशिष्टे ।
कष्टदृष्टिनिनदो बलिपुष्टो नान्यपुष्टमुपवेष्टुमपीष्टे ॥ ४ ॥

कर्मधारयवदुत्तरेषु ।

यत् क्षितौ सुखसुखेन वसन्तो मानसं जहति नाकनिवासे ।
मानवाः किमपि विप्रवसन्तो हन्त तत्र जिहते खलु वाञ्छाम् ॥ ५ ॥

अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् ।

वर्णसङ्करकृतिस्तु पटेषु प्रेर्यते न खलु निष्कपटेषु ।
तज्जनैर्नृषु यथायथवृत्तिप्राप्तवृत्तिषु तदीयधरायाम् ॥ ६ ॥

यथास्वे यथायथम् ।

तस्य नीतिनयनस्य विनेतुर्दण्डनीयखलदण्डनकार्ये ।
भिद्यते खलु कुतोऽपि न ते मे बुद्धिभिः किमपि शिक्षणमार्गः ॥ ७ ॥

तेमयावेकवचनस्य ।

राजभिः सह परैर्युधि शास्तुः कीर्त्तिराहवचितापहतत्वात् ।
त्रिष्टपैस्त्रिभिरपि त्रिविधत्वं भ्रंशिवेत्य परितिष्ठति तस्य ॥ ८ ॥

नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ।

सुष्ठु मेदुरयता भुवि धर्मं कर्मभिः सवनैरमुनाहो ।
मेदुरा दिवि कृतास्त्रिदिवेशा दुष्करा न किमसङ्गतिरित्थम् ॥ ९ ॥

न मु ने ।

शास्त्रिभिः परिचितेऽपि सुरूपे भासते खलु रसोऽपि गुणेऽस्मिन् ।
तार्किकैरगुणतां च गुणौघे साधितां स न जहाति विचित्रम् ॥ १० ॥

नलोपः प्रातिपदिकान्तस्य ।

गण्यते सुगुणहारपराभिर्दूरगेऽपि तमसो गणिकाभिः ।
राजनि स्फुटगतिर्ग्रहणार्थं मुग्धतात्र बत शोकवती हि ॥ ११ ॥

मादुपधायाश्च मतोर्वोऽयवादिभ्यः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दोषशुद्धिकृदुपाश्रयमात्राद् देहभूतिपरिबृंहणकारी ।
भासतेऽयमगदोऽत्र यशस्वान् व्याधिहा वररसायनरूपः ॥ १२ ॥

उदाहरणान्तरम् ।

नायकवर्णनम्—

प्लायतेऽस्य खलकालियकालव्यालकेलिमलिरुक्चपाली ।
कृष्णपादयुगमुद्रणशोभां बिभ्रती भ्रकुटिला तनुपुच्छा ॥ १३ ॥

उपसर्गस्यायतौ ।

बालके कुटिलतां स शशाङ्के न न्यवर्त्तयत शिक्षणदक्षः ।
आत्मगोऽप्युपमितौ च कवीनां निःस्वतां परिहरन्निव धीमान् ॥ १४ ॥

संयोगान्तस्य लोपः ।

ईक्षणात् कुवलयादरयोग्यात् कामपूरणचणात् सुदृशोऽस्य ।
पुष्टिमाशु विपुलां प्रलभन्ते हन्त नेतुरबलाविपरीताम् ॥ १५ ॥

रात्सस्य ।

नासिकां नतमुखं तिलपुष्पं प्रार्थयन्निखिलरोचिरसेवीत् ।
भूपतेः श्रितपरस्य न युक्ता नासिका नतजनस्य हि दत्ता ॥ १६ ॥

इट ईटि ।

रागमस्य रदनच्छदलग्नं तत्र रागमधिकं रमणीयम् ।
जानती विफलतां च फले स्वे काननं किमधितिष्ठति बिम्बी ॥ १७ ॥

स्कोः संयोगाद्योरन्ते च । 'रमणीनाम् । जानती' इति च पाठः ।

दन्तपङ्क्तिमिषहीरनिबद्धं तस्य चारुरसनास्तरणाढ्यम् ।
भारतीनटनमण्टपमास्यं वक्ति सूक्तिसुकलानिलयस्य ॥ १८ ॥

चोः कुः ।

तच्छ्रुती श्रुतिसुधापरिपूर्णे विश्रुतश्रुतघटेन घटे किम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आस्ययोर्भृशमपूपविधानाद् गूढता तदनयोः सुघटेत ॥ १९ ॥
हो ढः ।

साङ्कमिन्दुमपि रेणुविदिग्धं पङ्कजं न कलयाम्युपमानम् ।
अस्त्यनन्वय इहान्यसमानैस्तन्मुखस्य हि तदेव सदृक्षम् ॥ २० ॥
दादेर्धातोर्घः ।

शङ्खमेव गलमादधदिष्टं भ्रान्तिमावहति घोरनिनादम् ।
चित्रवर्णवहनान्मृदुकेकानिःस्वनादयमिहास्ति विचित्रम् ॥ २१ ॥
व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ।

तस्य भोगिवरभोगसमत्वं दीर्घपीवरतयैव न बाह्वोः ।
भूमिभारभरणादपि योऽयं तत्त्वमुद्वदति सर्वगुणानाम् ॥ २२ ॥
एकाचो बशो भष् झषन्तस्य स्ध्वोः ।

पल्लवातिमहितो बहुदाता मान्यनन्दनपरो महदिष्टः ।
दानवारिपरिपूततलोऽसौ तत्करः सुरतरोरविशेषः ॥ २३ ॥
झलां जशोऽन्ते ।

वक्षसा क्षितिपतेस्तु विपक्षक्षोणिभृत्क्षयपरिक्षयकृत्ये ।
तद्वनेष्वपहतेषु च तैस्तैस्तत्कवाटतता किमु लब्धा ॥ २४ ॥
झषस्तथोर्धोऽधः ।

स्वादृतं चिरमवेक्ष्य मुरारिं भूपहृत्सरसिजान्तरलग्नम् ।
भूमिपोदरमिषाद्वटपत्रं तं गृहीतुमुपतिष्ठति नूनम् ॥ २५ ॥
ओदितश्च ।

भूभृतामपि समीपगतानां क्षीणतप्तवपुषां निजमूर्ध्ना ।
तापहारिणि मनोहररूपे युज्यतेऽस्य चरणेऽम्बुजधर्मः ॥ २६ ॥
क्षियो दीर्घात् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शुष्कगर्वरिपुभूपविनाशे स्या मनः क्वचन तच्छिरसोऽधः ।
इत्यवेत्य किमिहोन्नतिभाजस्तन्नखाः परिलसन्ति सुवृत्ताः ॥ २७ ॥

शुषः कः ।

नायकस्य दिनचर्याकथनम्—

उल्लाघमुल्लासितशीलसम्पदं सम्प्राप्तसामुद्रिकसारलक्षणम् ।
आचारवर्गोऽपि निषेवते क्रमाद्रूपं गुणा नो जहतीति विश्रुतम् ॥ २८ ॥

अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः ।

सारस्वतं याममवेत्य सङ्गतं निद्रा समुत्सृज्य नृपं प्रधावति ।
वाराङ्गनेवाभिकभर्तृलालिता हीणा तदीयां महिषीं रुषागताम् ॥ २९ ॥

नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम् ।

निद्रार्पितानेकदिशाश्रमश्रमं ध्यातस्तदाश्लिष्यति तन्मनो हरिः ।
लोका विवासप्रभवां परां शुचं मार्जन्ति संश्लिष्य हि सङ्गतं प्रियम् ॥

न ध्याख्यापृमूर्च्छिमदाम् ।

मैत्र्या नृपेणाप्यनुरूपमन्वहं स्वस्यास्य चाप्यैक्यमथानुचिन्त्यते ।
तुष्यत्यभेदाकलनाद्यथा सुहृन्नानेकवित्तैरपि तर्पितस्तथा ॥ ३१ ॥

वित्तो भोगप्रत्यययोः ।

सौधात् सुधौतादवरोहतामुना स्वाङ्गाङ्गरागोत्थसुगन्धनिर्वृतः ।
सामन्तभूपप्रकरः कृतोपदो भ्रूनेत्रकम्पैरनुकम्प्यते नतः ॥ ३२ ॥

अदसोऽसेर्दादु दो मः ।

व्यायामभिथ्याभिनयादयं स्वयं वीथ्यां हयेन प्रचरन्मितानुगः ।
खेदं जनानां प्रतिवासरं हरन्मोदादमीभिः परिलाल्यते ततः ॥ ३३ ॥

एत ईद् बहुवचने ।

रत्नोज्ज्वलस्वर्णमहागलन्तिकानिर्यातसंस्कारसुगन्धिवारिभिः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मृष्टोऽथ मज्जन् स शुचिर्विभासते नूनं गृहीत्वेव वपुर्जलाशयात् ॥ ३४ ॥

समः सुटि ।

हारौघताराबलिसङ्गतान्तिकः कर्णोत्थहीराग्रचमिषोत्तरान्तरे ।
नीहाररश्मिर्वदनं धरापतेः कांस्तोषयेन्नोत्स्मितचन्द्रिकाततम् ॥ ३५ ॥

नश्छव्यप्रशान् ।

धत्ते स मृत्सामयमूर्ध्वपुण्ड्रकं फाले स्वफालेक्षणतास्मृतिप्रदम् ।
नारीमुखाब्जं विकसत्यवेक्ष्य यन्मत्वांशमिन्दोः किमगूढखण्डितम् ॥

ढो ढे लोपः ।

भूतिर्विभक्त्यैव यथाविधि त्रिधा प्रातन्यतेऽङ्गेषु महाविभूतिना ।
स्वात्मीयपान्थाभिमतप्रपूरिणा नीरन्ध्रकीर्त्योभयलोककाम्यया ॥ ३७ ॥

रो रि ।

रेखासुवर्णाढ्यहराक्षमालिका हस्तेऽस्य धत्ते जप उद्यतात्मनः ।
राजीवपर्यन्तनिपातितद्रजस्सम्भिन्नगात्रभ्रमरौघविभ्रमम् ॥ ३८ ॥

लोपः शाकल्यस्य ।

गोत्रारितुल्यस्य सुगोत्रजन्मवद् गोत्रासुरत्राक्रियमाणसम्पदः ।
पात्रानवाप्त्या नृपतेर्धनोत्करा विश्रान्तिमृच्छन्ति दिनेषु नान्यथा ॥

हलि सर्वेषाम् ।

अर्थांल्लभन्तेऽपररात्रबोधिता वाञ्छाधिकान् सत्कवयो यथोर्जितान् ।
चेतःप्रसादेन तथात्र सज्जना दारिद्र्यसंहारकभूपमानिताः ॥ ४० ॥

मोऽनुस्वारः ।

भूदेववर्गैः परितः परिष्कृतो नेत्रोत्सवं पौरजनस्य सन्दिशन् ।
शृण्वन् हरिस्तोत्रवचांसि सादरं श्रीपद्मनाभार्चनमाचरत्यसौ ॥ ४१ ॥

नश्चापदान्तस्य झलि ।

स्वाहास्वधामन्त्रणतोष्यचेतसो हव्येन कव्येन च वाडवोत्तमैः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम्प्रीणयन्नूर्जितमिष्टभोजनैर्विप्रांश्च भुङ्क्ते सुकृताङ्गमीशिता ॥ ४२ ॥

ङमो ह्रस्वादचि ङमुण्नित्यम् ।

आलिप्तवर्णोत्तरयक्षकर्दमप्रोद्गच्छदामोदवशीकृतान्तराम् ।
प्राप्तः सभां धीसचिवैः समावृतो वृत्तिं नृणां धीसचिवः स पश्यति ॥

वा शरि ।

तत्राथ वैतण्डिकतां समादधुः केचित्तु राद्धान्तिकतां च पण्डिताः ।
भूपालहंसस्य ततो द्विजेरितैरासन्ध्यमासीत् समयः क्षणोपमः ॥ ४४ ॥

कुप्वोः ≍क≍पौ च ।

वञ्चीशपञ्चास्यमुखे तदावृता षट्दर्शनी किन्न विवादगोचरा ।
द्वैताश्रयेऽल्पत्वमथैक्यसंश्रये यच्चाधिकत्वं विबुधेषु दृश्यते ॥ ४५ ॥

आदेशप्रत्यययोः ।

सा यामिनी स्वामिनमावृता स्वयं कामं पुरस्कृत्य सकामिनीजना ।
काले पुनस्तं परिषेवते चिरं के वा न रक्ष्या नृपतेः समाश्रिताः ॥४६॥

परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् ।

यथोचितं प्राप्तानां ऋतूनां वर्णनम्—

इत्थं प्रशस्तदिनचर्यममुं नृपेन्द्रं निस्सीमनिष्षमगुणावृतसर्वलोकम् ।
श्रुत्वेव तत्पदनिषेवणदत्तचित्तास्तत्राभवन् षडृतवः प्रथिताः क्रमेण ॥

सुविनिर्दुर्भ्यः सुपिसूतिसमाः ।

प्राप्तो मधुः प्रियकरो जगतामृतूनां अग्रेष्ठः प्रशस्तसुमभूषणरम्यमूर्तिः ।
कूजन्मधुव्रतवृतः सलयो नभस्वल्लीलोच्चलत्किसलयैर्धृतगायकश्रीः ॥

अग्रेष्ठोऽग्रगामिनि ।

तन्मित्रमुत्सुकपिकस्वनहुङ्कृतेन पश्यन्नशोकनवपल्लवरक्तदृष्ट्या ।
आस्तीर्णचूतकलिकाशरवारवर्षी कामो वियोगिहृदयानि दहन् प्रवृत्तः ॥

रषाभ्यां नो णः समानपदे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यद्यस्ति वाच्यमखिलं वदताशु यात प्रेयस्समीपमिह मास्तु विलम्बलेशः ।
निर्भर्त्सिता इव पिकैरिति मानवत्यः प्रेम्णागमन् प्रियतमान् गुरुणा वसन्ते ॥

अट्कुप्वाङ्नुम्व्यवायेऽपि ।

ग्रीष्मोऽथ भीष्मतरतापकरः प्रवृत्तस्तेजःप्रभावसदृशीकृतवह्निभूपः ।
सत्पल्लवास्तृतपटालिकचत्वरान्तर्गेहस्थितैर्नृभिरमानि सुनीरपाणैः ॥

वा भावकरणयोः ।

प्रापे क्रमादवनिवृत्रहणि प्रतुष्ट्यै तत्पुष्करं विधृतपुष्करपुष्कलाभैः ।
मेघैरमोघमिह यत्नमुपाचरद्भिर्दूतीजनस्य घटने नृषु मानिनीनाम् ॥

एकाजुत्तरपदे णः ।

केकारवाः सुभृशशीतलवातपाता जातीसुमानि चपलारुचयो यथास्वम् ।
यूनोस्तदा प्रणयिनोर्वपुषोरभेदं प्रादुर्मनोभवरसार्द्रतया जवेन ॥ ५३ ॥

उपसर्गादसमासेऽपि णोपदेशस्य ।

शुभ्राभ्रविभ्रमयुताभ्रतलप्रवृत्तनक्षत्रनाथकिरणोत्करतोषिताशा ।
कुम्भोद्भवांशुकतकांशविशोधितापामोदं क्षितेरथ शरत् प्रणियच्छति स्म ॥

नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च ।

पद्मान्यकल्मषजलाशयभाञ्ज्यभूवन्
पाकोत्तराश्च कलमाः खलमाननीयाः ।
सस्यानि शस्यफलवन्ति बृहन्ति यस्यां
सास्मिन् शरत् प्रणिभिनत्ति न कस्य खेदम् ॥ ५५ ॥

शेषे विभाषाऽकखादावषान्त उपदेशे ।

प्रापच्छ्रियं विरहयन् कमलाकरस्य कालो हिमो विदलयन् प्रमदाधरं च ।
तं दाक्षिणात्यपवनोऽन्वगमज्जनोऽस्मात् क्रूराद्भियेव सहसा प्रमदाधरोऽभूत् ॥

स्तोः श्चुना श्चुः ।

तत्रागमत्पुनरृतुः शिशिरोऽभिशस्तः षष्ठः स्ववेगशिशिरीकृतसर्वलोकः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नारीवरोरुजघनस्तनभारलीनगात्राः कथञ्चन नरास्तम

ष्टुना ष्टुः ।

काव्योपसंहारः—

इति कुलविभवश्रीतुल्यरूपानुरूपप्रगुणितगुणविद्याचारशी
चिरमवति धरित्रीं वञ्चिभूदेवदेवः सुकृतमिह जनानां प्राभ

अनचि च ।

विप्रौघास्तपसोर्जिता नरपतेर्निःश्रेयसप्रार्थिनः
सम्प्रापन् स्वरसादहर्दिवमतः सौवस्तिकत्वं
राजानोऽपि सहायतामुपगता वार्त्तापराश्चोरुजाः
पादोत्था वरिवस्यया धृतसुखा भाग्यं जनान

उदः स्थास्तंभोः पूर्वस्य ।

इत्थं श्रीवञ्चिपृथ्वीश्वरचरितमिदं किञ्चिदुक्तं प्रसिद्धं
श्रीमद्व्याघ्रालयाधीश्वरचरणजुषा केनचित् पद्
प्रोद्यच्छ्रीपद्मनाभप्रथितगुणगणत्वेन वा कीर्त्तिलौल्याद्
वञ्चिक्ष्मापालकानां सुविमलमनसां सत्कवीनां

शश्छोऽटि ।

आश्लेषिकाभविहितावतरस्य मान्य-
श्रीवञ्चिभूमितिलकस्य महामहिम्नः ।
श्रीरामवर्मवसुधाधिपतेश्चरित्रे
सर्गोऽष्टमोऽपि सुगमोऽगमदत्र काव्ये ॥ ६१ ॥

'र्मविपुलाधिपते' इति च पाठः ।

इति रामवर्ममहाराजचरित्रेऽष्टमः सर्गः.

आश्लेषानक्षत्रजातश्रीरामवर्मवञ्चिमहीमहाराजचरित्रं काव्यं समाप्तम्.

Bhawani Shankaracharya Sanskrit Mahavidyalaya ... 720

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE